गीतगिरीशम्

[रागकाव्यम्]

रचयिता

कविनृपतिरामभट्टः

सम्पादकः

प्रभातशास्त्री

गीतगिरीशम्

[रागकाव्यम्]

रचयिता

कविनृपतिरामभट्टः

सम्पादकः

प्रभातशास्त्री

● प्रकाशक :
देवभाषाप्रकाशनम्
दारागंज-प्रयागः

● प्रथमसंस्करणम्
संवत् – २०२७ वि०
मूल्यम् – मुद्राः षट्

● मुद्रक :
भारतीमुद्रणालयः
दारागंज-प्रयागः

GĪTAGIRĪŚAM

[RagaKavyam]

By

KAVI NRPATI RAMABHATTA

Edited by

PRABHATA SASTRI

● Published by
Devabhasa Prakasanam
Daraganj, Allahabad—6

First Edition
1970
● Price Rs. Six

● Printed at
Bharati Mudranalaya
Daraganj, Allahabad—6

भूमिका

संस्कृतभाषायाः प्राचीनं वाङ्मयं यत्र काव्यैर्नाटकैर्व्याकरणैः साहित्यालोचनैस्तथोत्कृष्टकोटिकैर्दार्शनिकैर्ग्रन्थैरत्यन्तं समृद्धमास्ते, तत्रैवैतिहासिकैस्तथ्यैः परिपूर्णासु महापुरुषाणां जीवनविषयिणीष्वात्मकथासु यात्रासाहित्यादिविषयेषु च दुर्बलं वर्तते।

अस्यायं परिणामोऽस्ति यत् कस्याऽपि महापुरुषस्याऽथवा लेखकस्य जीवनसम्बन्धे किमपि लिखितुं केवलमनुमानप्रमाणस्य साहाय्यं भवति। सैव स्थितिः प्रस्तुतायाः कृतेर्लेखकस्य कवे रामभट्टस्य विद्यते।

कविरसौ स्वपुस्तकस्याऽन्ते स्वात्मनः संक्षिप्तं संस्तवं प्रयच्छन्[1] स्वपितुर्नाम श्रीनाथभट्टस्तथा स्वाभिधानं रामभट्ट इति लिलेख।

अथाऽस्य कवेरपरं नामरामजिद् भट्ट[2] इत्यपि चास्ते।

---

१. आसीदसीममहिमा स हिमावदातमूर्तेर्भवस्य चरणाऽर्चनयाऽऽप्तकीर्तिः।
श्रीनाथभट्ट इति तत्तनयेन रामनाम्नाऽद्भुतं व्यरचि गीतगिरीशमेतत्॥
—गीतगिरीशम्। सर्गः १२। श्लोकः ४।

२. वचनार्णवमालोक्य, मुनीनां मितवादिनी।
स्वविभागविवेकस्य, टीका रामजिता कृता॥
पुष्करिणी मितवादिन्येषा, पार्श्वे मिताक्षरा सिन्धोः।
सज्जनमनोमरालाः, खेलन्त्वत्र यान्तु निःशङ्कम्॥
—इति श्रीभट्टरामजिद्विरचिता भागविवेकटीका मितवादिनी समाप्ता। (इण्डिया ऑफिस लाइब्रेरी लन्दन, संस्कृत मन्युस्क्रिप्ट, केटलॉग। भाग ५। पृष्ठम् ४६४)

रामजित्कविवर्णितं कलिकल्मषं विनिहन्ति।
गीतमेतदधीतमाशु लसद्यशोऽपि तनोति॥
—गीतगिरीशम्। सर्गः ३। श्लोकः ८।

अस्य ज्ञानं गीतगिरीशेन तथाऽनेनैव लिखितस्य धर्मशास्त्रसम्बन्धिपुस्तकस्य धनविभागविवेकस्य स्वरचितायाष्टीकाया अन्तिमेन श्लोकेन भवति ।

संस्कृतभाषायाः अन्ये कवय इवाऽसौ कविरपि नातोऽधिकं स्वकीयदेश-कालादीनां विषये किमपि लिलेख ।

संस्कृतभाषायां रामभट्टनामानः षोडश ग्रन्थकारा बभूवुः । सुप्रसिद्धः शर्मण्य-देशीयो विद्वान्—आफ्रेट इत्याख्यः षोडशग्रन्थकाराणामुल्लेखं [१]केटलागस केटलागारमनामके स्वकीये ग्रन्थे कृतवान् । अस्य रामभट्टस्य विषयेऽयमत्यन्त-संक्षेपत एतावदेव लिखितवान्—"श्रीनाथस्य पुत्रो गीतगिरीशस्य तथा धनविभाग-विवेकस्य कर्ता" ।

केवलमनुमानाधारेणाऽस्य जन्मकाल ईसवीयषोडशशताब्द्याः पूर्वभागो मन्तुं शक्यते ।

रायलएशियाटिकसोसायटी कालिकाता—इति संस्थाने गीतगिरीशस्य हस्त-लिखितपुस्तकद्वयं वर्तते यत्रैकस्य[२] प्रतिलिपिकालः संवत् १७५९ विद्यते । अस्येसवीयवर्षे परिणते कृते सति १७०२ निष्पद्यते ।

१—१, रामभट्टः, नीलकण्ठस्य पिता, कृतिः—काशिकातिलकः, २—राम-भट्टः, (राघव उल्लिलेख) ३—भट्टरामः, कृतिः—उज्जीवितमदालसा नाटकम्, ४—रामभट्टः, कृतिः—कौतुकलीलावती, ५—रामभट्टः, कृतिः—त्रिंशच्छ्लोक्यर्थः, ६—रामभट्टः, कृतिः—दाक्षिण्यकालिकानित्यपूजापद्धतिः, मातंगिनीपद्धतिः, ७—रामभट्टः, कृतिः—ब्रह्मामृतम्, ८—रामभट्टः, कृतिः—प्रक्रियाकौमुदीटीका, ९—रामभट्टः, कृतिः—मदालसानाटकम्, १०—रामभट्टः,—कृतिः—रामकल्पद्रुमः, ११—रामभट्टः, कृतिः—रामविक्रमचन्द्रिका, १२—रामभट्टः—कृतिः—संक्षिप्तहोम-प्रकारः, १३—रामभट्टः,कृतिः—सापिण्ड्यनिर्णयः, १४—रामभट्टः, कृतिः—सारस्वतप्रक्रियाटीका, १५—रामभट्टः, कृतिः—भूपतिसहदानरत्नाकरः, तथा १६—रामभट्टः—कृतिः गीतगिरीशम्, श्रीनाथपुत्रः, (पृष्ठम् ५०५ तथा ५०७)

२—द्रष्टव्यताम्—संवत् १७५९ वर्षे श्रा वदि १३ शनौ श्री० त्रं गोपालजी गणेश सुतेन लिखितं स्वपठनार्थम् । (रायल-एशियाटिक-सोसायटी कालिका-ताया: सूची-पृष्ठम् १८१)

प्राचीनकालेऽद्यत्व इव मुद्रणस्य, यातायातस्य च व्यवस्था सुलभा नाऽऽसीत्। अतः कस्यचिद् ग्रन्थस्य प्रचारे ख्यातिप्राप्तौ च वर्षशतं व्यत्येति स्म। अस्य तर्कस्याधारेऽस्य ग्रन्थस्य रचनाकालः षोडश्याः शताब्द्याः पूर्वभागस्य स्वीकरणं नानुचितं स्यात्। ग्रन्थस्यास्य लिप्याऽपि लेखकस्येदं कालनिश्चयकरणं न्यायसंगतं भवति। ग्रन्थस्यास्य विवरणं वितन्वानो महामहोपाध्यायः स्वर्गतो हरप्रसादशास्त्रिवर्योऽस्य लिपिमधिकृत्य प्राचीनां लिपिं [१]'ओल्ड नागर' लिपिं लिखितवान्।

नाम्ना साकं भट्टशब्दस्य प्रयोगेनैतन्निश्चितमस्ति यदसौ जात्या गुर्जरोऽथवा महाराष्ट्रियो ब्राह्मणोऽभूदिति। प्रायेणाऽनयोरेव प्रदेशयोर्ब्राह्मणा स्वनाम्ना साकं भट्टोपाधिं संयोजयन्ति। स एष धर्मशास्त्रविषयकं धनभागविवेकाख्यं ग्रन्थं रचयामास, तथा गीतगिरीशे गणेशस्य स्तुतावेकामष्टपदीं लिलेख—अनेनास्माकं धारणा भवति यदसौ रामभट्टो महाराष्ट्रियो ब्राह्मणः। तदिदमेतदर्थं यन्मुगलकाले खल्वेतद्देशीयैर्ब्राह्मणैर्धर्मशास्त्रीयग्रन्थानां लेखनस्य परम्परा रूढाऽऽसीत्तथाऽस्मिन्नेव प्रदेशे प्राचीनकाले गणेशोपासकः सम्प्रदायो बभूव योऽद्यापि चास्ते।

अथास्य गीतकाव्यस्य[२] आत्मारामकृतैका टीकाऽपि च वर्तते। अस्याश्चर्चा पण्डितपरिवारस्य गृहस्थितानां पुस्तकानां सूच्यां वर्तते। अहं हि बहु प्रायस्यं परन्तु नेयं टीका मम दृक्पथमवततार। अनेन ज्ञायते यद्धि जयदेवस्य गीतगोविन्दस्येवाऽस्य गीतकाव्यस्याऽपि च पण्डितसमाजे पठनपाठनयोर्लोकप्रियताऽऽसीत्। लोकप्रियतां विना कस्याऽपि ग्रन्थस्य टीकालेखनस्य परम्परा प्राचीनकालेऽस्माकमत्र देशे नाभूत्। बहुप्रचलिते तथा च विद्वत्समाजे समादृते ग्रन्थ एव प्रायेण टीकाकाराष्टीकां लिखन्ति स्म।

१—कन्ट्रोल्डपेपर, ५=३½, इन्चेज, फोलियो १७ (बाई काउण्टिंग), विदाउट बिगिनिंग, लाइन्स ११–१८, आन ए पेज। कैरेक्टर, ओल्ड नागर। अपियरेन्स डिसकलर्ड। डेट शक० १७५६।

२—द्रष्टव्यताम्—केटलाग आफ संस्कृतमन्युस्क्रिप्ट प्राइवेट् लाइब्रेरीज आफ दि नार्थवेस्ट प्राविन्सेज प्रथमो भागः पृष्ठम् १६। १८७४। ईसवीये वर्षे वाराणस्यां मेडिकलहालमुद्रणालये मुद्रितम्।

गै–धातोर्भावे क्तप्रत्ययप्रयोगाद् गीतशब्दः सिद्ध्यति। (गीयते इति गीतम्) [१]अमरकोषस्य रचयिता गीतं गानं च समानार्थौ शब्दौ मन्यते। भट्टश्रीहलायुधोऽपि [२]चाभिधानरत्नमालायां गीतं गानञ्च पर्यायार्थवाचकौ शब्दौ स्वीकृतवान्। चिरकालादद्यपर्यन्तं सोऽयं शब्दोऽपठितात् साधारणाज्जनादारभ्य साहित्यस्य प्रकाण्डपण्डितैरपि शब्दोऽयं गानार्थे निरन्तरं प्रयुज्यमानोऽस्ति। [३]कालिदासादयो महाकवयश्चाऽपि गीतशब्दं गानार्थकमेव प्रयुयुजिरे। अनेनैव शब्देन साकं समुपसर्गस्य संयोगात् संगीतशब्दोऽस्ति निष्पन्नः। गीतस्य, संगीतस्य शब्दयोर्द्वयोरर्थभेदोऽस्ति। वाद्येन, नृत्येन सह वर्तमानं गीतं संगीतमित्यभिधीयते[४]।

विदुषां साधारणजनानाञ्च समाजे लोकप्रियस्य संगीतस्य महत्त्वं परिवीक्ष्य भगवान् गोविन्दोऽपि [५]गीतायां संगीतात्मकसामवेदस्यैव गरिमाणं स्वीचकार। संगीतस्य स्वरसमाजः सुरसमाजमपि मोहयति। एतद्विषये प्रबला पौराणिकी गाथाऽपि वर्तते। [६]वाद्यबलात् प्रलयङ्करमपि शङ्करं दशाननो मोहयामास। [७]संस्कृतभाषायां संगीतविषये आभाणकमपि वरीवर्ति।

१—गीतगानमिमे समे। अमरकोषः। प्रथमं काण्डम्। श्लोकः २५।

२—गीतं गानमिति प्रोक्तम्। अभिधानरत्नमाला। प्रथमं काण्डम्। श्लोकः ९३।

३—आर्ये, साधुगीतम्। "तवाऽस्मि गीतरागेण हारिणा प्रसभं हृतः"। अभिज्ञानशाकुन्तलम्, प्रथमाङ्कः, प्रस्तावना।

४—गीतं वाद्यञ्च नृत्यञ्च त्रयं संगीतमुच्यते।
—दामोदरकृतसंगीतदर्पणे

५—वेदानां सामवेदोऽस्मि।
—भगवद्गीता। दशमोऽध्यायः। श्लोकः २२।

६—शुष्कस्नायुस्वराऽऽह्लादात् त्र्यक्षं जग्राह रावणः।
—प्राचीना सूक्तिः

७—संगीतं कस्य मोहयेत्। सद्यः प्रीतिकरो रागः।
—आभाणकम्

आचार्यो वात्स्यायनो गीतशब्दं [1]चतुःषष्टिकलास्वन्तर्जग्राह । भारतीयेतिहासस्याऽऽरम्भकाले, मध्यकाले च नागरिकाणां गोष्ठीषु परिषत्सु च संगीतस्य, नृत्यकलायाः, काव्यचर्चायाश्च समधिकमभिरुचिः समुपलभ्यते । वात्स्यायनस्य 'कामसूत्रे' दण्डिनो 'दशकुमारचरिते', बाणभट्टस्य 'हर्षचरिते' तथा 'कादम्बर्यां' चास्योल्लेखः सुस्पष्टमास्ते । वस्तुतः संगीतं नागरिकजीवनविलासस्यैकमङ्गमेवाऽऽसीत् । अस्य ज्ञानं विना मानवः शिष्टे सुसंस्कृते च समाजे सम्मानाऽऽदरयोरधिकारी न मन्यते स्म । नैतदेव, [2]भर्तृहरिः संगीतमजानन्तं जनं पुच्छविषाणं विहीनं पशुमुक्तवान् ।

१—द्रष्टव्यताम्—

गीतम्, वाद्यम्, नृत्यम्, आलेख्यम्, विशेषकच्छेद्यम्, तण्डुलकुसुमवलिविकाराः, पुष्पास्तरणम्, दशनवसनाङ्गरागः, मणिभूमिकाकर्म, शयनरचनम्, उदकवाद्यम्, उदकाघातः, चित्राश्च योगाः, माल्यग्रथनविकल्पाः, शेखरकापीडयोजनम्, नेपथ्यप्रयोगाः, कर्णपत्रभङ्गाः, गन्धयुक्तिः, भूषणयोजनम्, ऐन्द्रजालाः, कौचुमाराश्च योगाः, हस्तलाघवम्, विचित्रशाकयूषभक्ष्यविकारक्रिया, पानकरसरागासवयोजनम्, सूचीवानकर्माणि, सूत्रक्रीडा, वीणाडमरुकवाद्यानि, प्रहेलिका, प्रतिमाला, दुर्वाचकयोगाः, पुस्तकवाचनम्, नाटकाख्यायिकादर्शनम्, काव्यसमस्यापूरणम्, पट्टिकावेत्रवानविकल्पाः, तक्षकर्माणि, तक्षणम्, वास्तुविद्या, रूप्यरत्नपरीक्षा, धातुवादः, मणिरागाकरज्ञानम्, वृक्षायुर्वेदयोगाः, मेषकुक्कुटलावकयुद्धविधिः, शुकसारिकाप्रलापनम्, उत्सादने संवाहने केशमर्दने च कौशलम्, अक्षरमुष्टिकाकथनम्, म्लेच्छितविकल्पाः, देशभाषाविज्ञानम्, पुष्पशकटिका, निमित्तज्ञानम्, यन्त्रमातृका, धारणमातृका, संपाठ्यम्, मानसी काव्यक्रिया, अभिधानकोषः, छन्दोज्ञानम्, क्रियाकल्पः, छलितकयोगाः, वस्त्रगोपनानि, द्यूतविशेषाः.....च विद्यानां ज्ञानम्, इति चतुःषष्टिरङ्गविद्याः ।

—कामसूत्रम् । अधिकरणम् १ । अध्यायः ३ ।

२—साहित्यसंगीतकलाविहीनः, साक्षात् पशुः पुच्छविषाणहीनः ।

—'भर्तृहरिशतकम्'

वैदिकानामृषीणामपि संगीतस्य सुष्ठु ज्ञानमासीत् । ऋग्वेदस्य बहवो मन्त्राः संगीततत्त्वेन पूर्णरूपेणौतप्रोताः सन्ति । नैतदेव, गेयपदेष्विव वैदिकेषु मन्त्रेषु[१] पदावृत्तिः समुपलभ्यते । मन्त्राणामुच्चारणायोदात्ताऽनुदात्तस्वरितेति त्रयाणामेतेषां स्वराणां प्रयोगो विधीयते । वैदिककाले—आर्यगणास्ता इमा ऋचो गायं गायं पेठुः । ऋग्वेदस्य तुलनायां सामवेदस्य मन्त्रेषु गीततत्त्वमधिकमास्ते । तस्मादेव हि वेदोऽयमार्चिको गेयश्चेति भागयोर्द्वयोर्विभक्तो दरीदृश्यते । गेयभागो यज्ञसमय उद्गातृगणैर्मधुरेण स्वरेण गीयते स्म । सामवेदे दुन्दुभिस्कन्दवीणादीनां वाद्ययन्त्राणामुल्लेखो वर्तते ।

कालक्रमेण संगीतं शास्त्ररूपं दधौ । संस्कृतभाषायां विषयमिममधिकृत्य विद्वांसः पाण्डित्यपूर्णान् ग्रन्थान् लिलिखुः । तेषु केचित्तु विनाशं जग्मुः,

---

१—इति वा इति मे मनोगामश्वं सनुयामिति । कुवित्सोमस्यापामिति ॥
प्रवाता इव दोधत उन्मा पीता अयंसत । कुवित्सोमस्यापामिति ॥
उन्मा पीता अयंसत रथमश्वा इवाशवः । कुवित्सोमस्यापामिति ॥
उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियम् । कुवित्सोमस्यापामिति ॥
अहं तष्टेव बन्धुरं पर्यचामि हृदा मतिम् । कुवित्सोमस्यापामिति ॥

—इत्यादयः ऋग्वेदस्याष्टमाष्टके षष्ठोऽध्यायस्य, १–१३ मन्त्राः ।

तथा—हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥

—इत्यादयः ऋग्वेदस्याष्टमाऽष्टके सप्तमोऽध्यायस्य, १–४ मन्त्राः ।

केचनाऽवशिष्यन्ते । तेषु शास्त्रीयसंगीतप्रणयिनां पण्डितानां मण्डल्यामद्यत्वेऽपि च राजकुमारस्य जगदेकमल्लस्य 'संगीतचूडामणिः', महाराजस्य हरपालस्य 'संगीतसुधाकरः', सोमराजदेवस्य 'संगीतरत्नावली', शार्ङ्गदेवस्य 'संगीतरत्नाकरः', अल्लराजस्य 'रसतत्त्वसमुच्चयः', पार्श्वदेवस्य 'संगीतसमयसारः', भुवनानन्दस्य 'विश्वप्रदीपः' तथा महाराणाकुम्भामहोदयस्य 'संगीतराजः' इत्येते ग्रन्था लोकप्रियाः सन्ति ।

ग्रन्थानामेतेषां लेखनप्रणाली अलङ्कारच्छन्दोनाट्यशास्त्रसम्बन्धिभ्यो ग्रन्थेभ्यो भिन्ना वर्तते । संगीतसम्बन्धिनां स्वरताललयमूर्च्छनाग्रामरागादीनां विवेचनं, विश्लेषणं तथा लक्षणं तु समुपलभ्यते परं छन्दोऽलङ्कारनाट्यशास्त्रसम्बन्धिषु ग्रन्थेष्विवोदाहरणान्युद्धृत्य प्रत्येकं विषयो ग्रन्थेष्वेतेषु नाऽवबोधितः । आस्माकीनोऽभिप्रायोऽयमास्ते यद्धि येन प्रकारेण धनञ्जयस्य 'दशरूपके' तथा च विश्वनाथस्य 'साहित्यदर्पणस्य' षष्ठे परिच्छेदे नाट्यविषयकाः सर्वेऽपि विषया लक्षणैः साकमुदाहरणानि दत्त्वा स्पष्टीकृताः सन्ति, सा पद्धतिः ग्रन्थेष्वमीषु नाऽऽस्ते । सम्भवतः संगीतग्रन्थेषु समुल्लिखितलक्षणाऽनुसारं किलोदाहरणानि संस्कृतभाषाऽनिबद्धान्यभूत्वा तत्कालीनासु देशीयासु भाषासु भवेयुस्तस्मादेव कारणात् ग्रन्थप्रणेतार उदाहरणानि नाऽवातरयन् ।

यवनदेशीयाः साहित्यकाराः काव्यं संगीतान्तर्गतं मेनिरे । पाश्चात्यसाहित्यशास्त्रानुसारं तस्य (काव्यस्य) विभिन्ना भेदा विद्यन्ते। यथा-प्रकृतिसम्बन्धी, धर्मसम्बन्धी, प्रणयसम्बन्धी, चतुर्दशपदी, स्तुतिसम्बन्धी, दार्शनिकगीतसम्बन्धी, शोकगीतसम्बन्धीत्यादयः । भारतीयानामलङ्कारशास्त्रस्याचार्याणां मते गीतकाव्यस्य न काऽपि स्थितिर्वर्तते । दण्डिभामहवामनरुद्रटमम्मट—आनन्दवर्धनविश्वनाथपण्डितराजजगन्नाथादय आचार्याः स्वग्रन्थेषु काव्यस्य विभिन्नानां भेदोपभेदानां वर्णनसमये गीतकाव्यशब्दस्य प्रयोगं तथा गीतात्मिकानां कृतीनां विवरणं न चक्रिरे । कदाचिदस्य मुख्यं कारणमिदं स्याद्यद्धि वात्स्यायनप्रभृतय आचार्या गीतं नाम काव्याद्भिन्नां कलाया अन्यां विधां स्वीचक्रुरिति । अनेन साहित्यशास्त्राचार्यैरेतदबोधि यत् सङ्गीतस्य, गीतात्मिकानां कृतीनां विरचनस्य, विश्लेषणस्य च कार्यं

कलाविवेचकानां ग्रन्थानामास्त इति । तस्मादेव कारणात् भारतीयाः साहित्य-शास्त्राचार्याः कृतीनामेवंविधानां चर्चां काव्यविवेचनस्य प्रसङ्गे न चक्रुः । भरतस्य नाट्यशास्त्रे 'छन्दोगीतकम्' तथा 'गेयपदम्' इत्यनयोः प्रयोगो लभ्यते ।

संस्कृतसाहित्यस्येतिहासस्य पाश्चात्त्या लेखकाः कीथप्रभृतयो मनीषिणः स्वकीयेष्वितिहासग्रन्थेषु गीतकाव्यस्य विवेचनं विदधिरे, विश्लेषणं च कृतवन्तः । तत्पाश्चात्त्यसाहित्यशास्त्रस्य परम्पराऽनुसारं स्थाने खलु, परमेतैरितिहासलेखकैः प्रभाविता भारतीयाः संस्कृतसाहित्यस्येतिहासलेखकाः कालिदासस्य मेघदूतं, पण्डितराजस्य जगन्नाथस्य भामिनीविलासं, अमरुकशतकं, भर्तृहरिशतकाद्या रचना गीतकाव्यानि प्रोचुस्तदस्माकं मते न साधु । तदेतद् भारतीयस्य संगीत-शास्त्राध्ययनस्याऽज्ञता तथा साहित्यशास्त्रपरम्पराऽनभिज्ञता वा प्रोच्येत, तर्हि नानुचितं स्यात् ।

अथ संगीतशास्त्रस्य नियमानुसारं गेयपदे[1] ध्रुवकस्यास्तित्वमत्यन्तमावश्यकमेव न, परञ्चाऽनिवार्यमास्ते यद्धि वर्तमानकालीनाः संगीतज्ञा 'टेक' इत्यभिदधति । अनेन (ध्रुवकेन) विना किमपि पदं गेयपदस्य कोट्यामन्तर्भवितुं न शक्नोति । अपि मेघदूतामरुशतकयोः धोयिकवेः पवनदूते विल्हणस्य चौरपञ्चाशिकायां गोवर्ध-नाचार्यस्य-आर्यासप्तशतीत्यादिषु काव्येषु संगीतशास्त्रस्य ध्रुवकस्य तथाऽन्येषां नियमानां पालनं कृतमास्ते ? यदि 'न' इति चेत्, तदा ता एताः कृतयः किमर्थं गीतकाव्यस्य कोटौ निधीयन्ते ? तदेतत् भारतीयस्य संगीतशास्त्रस्य नियमाना-मनभिज्ञता तथा च पाश्चात्यानामितिहासलेखकानामन्धानुकरणमेव वक्तव्यं भवेत् ।

अधुना प्रश्नोऽयं भवति यद् भारतीय-साहित्य-शास्त्रस्याऽचार्याः स्वरताल-लयबद्धा गीतात्मिकाः सरसाः कृतीः काव्यस्य कस्यापि भेदस्याऽथवोपभेदस्य कोटौ नास्थापयँस्तदा कविकोकिलस्य जयदेवस्य विश्वप्रसिद्धायाः कृतेर्गीतगोविन्दस्य

१—न विवेकं विना ज्ञानं, ध्यानं नात्र रसं विना ।
श्रद्धया न विना दानं, न गानं ध्रुवकं विना ।।
—रागार्णवनाम्नो ग्रन्थात्-हिन्दीसाहित्यकोशे-उद्धृतम् (पृष्ठम् २७५)

साहित्यजगति का नु खलु स्थितिरासीत् ? अपि गीतात्मिका रचनाः काव्यस्य कस्याश्चापि विधाया अन्तर्गता न भवन्ति स्म ? गीतात्मकशैल्यां लिखितानां कृतीनां कृते प्राचीनकाले को वा शास्त्रीयः शब्दोऽभूत् ? अमीषां सर्वेषां प्रश्नानामपि संक्षेपतः प्रसङ्गेऽस्मिन् विमर्शो नाऽनुपयुक्तः स्यात् ।

अभिनवगुप्तो भरतनाट्यशास्त्रस्य टीकायामभिनवभारत्यां गीतशब्दस्य व्युत्पत्तिं गीयते इति गीतं काव्यमुल्लिख्य[१] गीतस्य काव्यस्य च न किमप्यन्तरं मेने । प्रकारान्तरेण स गीतशब्दं काव्यस्य पर्यायवाचकं स्वीकृतवान् । अस्यामेव टीकायामभिनवगुप्तो गीतविधायां लिखितानां काव्यानां संज्ञां [२]रागकाव्यं लिलेख । नैतावदेवाऽपितु ढक्ककुभरागयोर्गीयमानयो 'राघवविजयस्य' तथा 'मारीचवधस्य' रागकाव्ययोर्द्वयोरुल्लेखमपि चकार । त इमे काव्ये नृत्यप्रधानेऽभिनयात्मके चाभूताम् । अनयोरभिनयो गानेन साकं क्रियते स्म । तत एवेमे रागकाव्ये प्रोक्ते । रागकाव्यानामस्मिन्नस्तित्वे स्वीकृते सति तदिदमपि सिद्ध्यति, यज्जयदेवात्पूर्वमित्थंविधानां रागकाव्यानां प्रणयनस्य स्वकीया परम्पराऽऽसीदिति। जयदेवस्य 'गीतगोविन्दं' तस्या एव परम्परायाः प्रतीकमास्ते,

---

१—गीयते इति गीतं, काव्यम् ।

—अभिनवभारती । अध्यायः ४ । पृष्ठम् १८० ।

२—अथोच्यते राघवविजयादिरामविजयादिरागकाव्यादिप्रयोगो नाट्यमेवाऽभिनययोगात् ।

—अभिनवभारती । अध्यायः ४ । पृष्ठम् १७२ ।

—राघवविजय-मारीचवधादिकं रागकाव्यम् ।

—अभिनवभारती । अध्यायः ४ । पृष्ठम् १८१ ।

—तथा हि राघवविजयस्य हि ठक्करागेणैव विचित्रवर्णनीयत्वेन निर्वाहः । मारीचवधस्य ककुभग्रामरागेणैव अत एव रागकाव्यानि उच्यन्ते एतानि ।

—अभिनवभारती । पृष्ठम् १८२ ।

नत्वपभ्रंशे लिखितस्य गीतकाव्यस्य । अतः संस्कृतसाहित्यस्य केषाञ्चिदितिहास-लेखकानां तदिदं कथनं 'यद्भारतीये साहित्येऽस्याः किलाऽनुपमाया रचनाशैल्याः सूत्रपातः सर्वादौ गीतगोविन्दाद् दृश्यत इति भ्रान्तिमूलकं वर्तते ।

अभिनवगुप्तस्तानीमानि रागकाव्यानि नाट्यकोट्यन्तर्भुक्तानि मेने । अतः संस्कृतसाहित्यवेत्तारः केचन पाश्चात्यमनीषिणो जयदेवस्य 'गीतगोविन्दं' [१]गोपनाट्यमथवा [२]गीतनाट्यादीनां कौटौ स्थापयन्ति तथा च केचन विदेशीया [३]भारतीयाश्च विद्वांसो मतस्यैतस्य विरोधं कुर्वते । अभिनवगुप्तस्य प्रोक्तेन साक्ष्येण नास्त्यस्य विरोधस्य किमप्यौचित्यम्, प्रत्युत गीतात्मिकाः कृतयः काव्यविधायामन्तर्गता मन्तव्यास्तथेदं गीतकाव्यं न कथयित्वा रागकाव्यं वक्तव्यम् । 'गीतगिरीश'मपि तस्यामेव रागकाव्यस्य परम्परायां विद्यते ।

---

१. जयदेवस्य ..... सैषा कविता लघ्वाकारं गोपनाट्यम् (पैस्टोरल ड्रामा) वर्तते, यथा जोन्स महाशयस्य मतमस्ति । तदिदमेकं गीतिनाट्यम् (लीरिक ड्रामा) विद्यते, यथा लासेनस्य कथनमस्ति । परिष्कृता यात्राऽऽस्ते, यथा फान श्रेडरमहाशयायास्य नामकरणं रोचते ।

(कीथस्य संस्कृतसाहित्यस्येतिहासः, पृष्ठम्–२३१–डा० मंगलदेव कृतो हिन्दी भाषान्तरः) ।

२. जयदेवः स्वं काव्यं सर्गेषु विभक्तं चकार तदिदमस्य तथ्यस्य स्पष्टं चिह्नमास्ते यत् सः काव्यमिदं काव्यकोटौ मेने । अङ्केषु तथा विष्कम्भादिषु विभज्य तदिदं नाटकीयप्रयोगं विधातुं तद्विचारो नाभूत् ।

(कीथस्य संस्कृतसाहित्यस्येतिहासः, पृष्ठम् २३२—डा० मंगलदेवकृतो हिन्दी भाषान्तरः) ।

३. किन्तु जयदेवो 'गीतगोविन्दं' सर्गेषु विभाजितवान् । अतस्तस्य स्वकृतेः काव्यान्तर्गत एव समावेशोऽभीष्टोऽभूत् ।

(संस्कृतसाहित्यस्य रूपरेखा, प्रथमं संस्करणम्, पृष्ठम् ३२६–ले० स्वर्गीय-चन्द्रशेखरपाण्डेयस्तथा च नानूरामव्यासः) ।

संक्षिप्तं कथावस्तु

प्रस्तुते काव्ये द्वादश सर्गाः सन्ति । कविरसौ मंगलाचरणादनन्तरं महताऽऽदरेण श्रद्धया च श्रीहर्ष, भारवि, तथा कविकुलगुरुं कालिदासं स्मृतवान्[१] । अस्मिन्नेव प्रसङ्गे कविरयं स्पष्टमुवाच यदहं काव्यमिदं कविराजराजस्य जयदेवस्यानुकरणेऽलिखम् । तत्पश्चात् कविरसौ विघ्नहरस्य गणेशस्य वन्दनात्मकमेकं गीतं विलिख्यऽत्यधिककौतूहलकारिण्या पद्धत्या काव्यकथायाः सूत्रपातं करोति । इत्थंविधेषु रागकाव्येषु कथायोजनाऽतीवाल्पीयसी भवति, तेषां विस्तारो भावानामुद्भावनायामेव बोभूयते । प्रणयस्य वियोगेन संयोगेन च तेषामाद्यन्तौ भवतः । गीतगिरीशस्याऽपि सैषा स्थितिर्वर्तते । प्रणयबद्धयोः शिवपार्वत्योर्वियोगसंयोगयोर्घटना, आलम्बनोद्दीपनरूपे—ऋतुवर्णनं तथा शिवो, गङ्गा, पार्वती तथा तयोर्जया विजयेति द्वे सख्यौ—तानीमानि पञ्च पात्राणीत्येतावदेव काव्यस्यास्य समस्तं कलेवरं विद्यते । सर्गक्रमेण कथासूत्रं, घटनाश्चैवंप्रकाराः सन्ति—

प्रथमः सर्गः

शिवस्य गङ्गायामनुरागमवलोक्य पार्वत्याः क्रोधो बभूव यद्यपि तमिममनुरागं शिवः पार्वत्या निगूढं प्रच्छाद्य संरक्षति तथापि पार्वती तमिममित्थं जानीते ।

---

१. हर्षं श्रीहर्षनामा रचयति वचनैरद्भुतार्थैर्दुरूहै-
र्गम्भीरैर्भारवीरपि तनुते चित्तपद्मप्रबोधम् ।
वाग्गुम्फैः सप्रसादैर्मृदुललितपदैः कालिदासः प्रसीद-
त्युच्चैर्लोकेषु तेषामहमपि चरणाऽम्भोजभृङ्गोऽस्मि रामः ॥

हर्यक्षं कपि नुवर्तते यथाऽयम्,
खद्योतो रविमपि निर्धनो यथाऽऽढ्यम् ।
औत्सुक्यादहमधुना तथाऽनुकुर्वे,
लालित्यं कविजयदेवभारतीनाम् ॥

—गीतगिरीशम् । सर्गः १ । श्लोकौ २–३ ।

'मत्समक्षं व्यर्थमेव हि स्वजटाजूटं वारंवारं विस्रंसनबन्धनव्याजात्त्वं गङ्गायाः स्पर्शस्यानन्दमाप्तुमिच्छसि, तथा मत्तो गोपायसि ।' पार्वती शिवमेतावदेवोक्तवती ।

तथा मानमास्थाय रुष्टा सती दारुवनं प्रतस्थे । ततः खलु काव्यकथायाः सूत्रपातो भवति ।

यद्यपि पार्वती ततः प्रचचाल, परन्तु विरहेण सन्तेपे । तस्याः सखी विजया तस्यास्तामिमां स्थितिं बुध्यन्ती तस्याः शिवेऽनुरागमुत्पादयितुमियेष, येन सा शिवान्तिकं निवर्तेत तच्छरीररक्षा च भवेन्नाम । सा विजयाऽत्र मधुमासे सुररमणीनां मध्ये विहरतोऽस्य शिवस्य वर्णनं पार्वतीं प्रति द्वाभ्यामष्टपदीभ्यां कृतवती ।

द्वितीयः सर्गः

पार्वती प्रतिनिवृते, तस्य मानभङ्गो बभूव, सा शिवं ध्यायन्ती सखीं प्रति स्वात्मनो विरहदशां वर्णयित्वा शिवेन सह समागमं कारयितुं प्रार्थयामास । प्रसङ्गेऽत्र द्वेऽष्टपद्यावासाते । शिवस्यानुरागदृष्टिं ध्यात्वा पार्वत्या व्याकुलताऽत्यर्थं वर्धमाना भवति ।

तृतीयः सर्गः

परन्तु निवृत्ताऽपि पार्वती तत्रोषितुं न पारयामास । सा ददर्श यत् शिवः किलैकमात्रं गङ्गां कण्ठे भुजालिङ्गितां कृत्वा विहरमाणोऽस्तीति । ततो गौरी पुनः क्रोधिता भूत्वा न्यवर्तत । अस्मिन् वारे पार्वतीमपगच्छन्तीमालोक्य शिवस्याऽनुरागोऽपि चोद्दीपे । सः स्वयमेवोत्कण्ठावशीभूतो बभूव । शिवस्य तस्या एवोत्कण्ठाया वर्णनमस्य सर्गस्यैकस्यामष्टपद्यां तथा पञ्चसुच्छन्दस्सु विद्यते ।

चतुर्थः सर्गः

अत्राऽन्तरे पार्वत्याः सखी विजया शिवसमीपमाजगाम तथा चोवाच—'भवद्विरहव्यथया पार्वत्याश्चित्तं मथितं बभूव । तेन कारणेन सोन्मना प्रतिनिवृत्ता तथैकं क्षणमपि युगमिव कष्टेन व्यतिगमयन्ती वर्तते । एकयाऽष्टपद्या

षड्भिश्छन्दोभिश्च पार्वत्यास्तां विरहव्यथां सखी वर्णितवती तथा शिवं स्वदर्शनेन पार्वतीं प्रसादयितुं प्रार्थयामास ।

पञ्चमः सर्गः

पार्वत्या विरहव्यथा, तदनुरागश्च शिवस्य रागरञ्जितमप्यन्तःकरणं अव्यथयेताम् । स हि जयां दूतीं प्रकल्प्य पार्वत्याः समीपं प्राहिणोत् । जया तत्र प्राप यत्र दारुवनस्य मधुपगुञ्जिते कुञ्जे गौरी विरहसन्तापादात्मानं रक्षन्ती समभूत् । तत्र सा पार्वत्याः समक्षं तद्विरहे सन्तप्तस्योत्कण्ठितस्य मूर्च्छितस्य च शिवस्यानेकासामवस्थानां वर्णनं चतसृभिरष्टपदीभिः षोडशच्छन्दोभिश्च चक्रे । इत्थं प्रकारेणानेन पार्वत्या अनुरागमपि प्रोद्दीप्तं विधाय सा मानभङ्गं कर्तुं प्रेरयामास ।

षष्ठः सर्गः

शिवस्य स्वात्मानं प्रत्यनुरागं तथा च तस्य विरहसन्तप्तामवस्थां श्रुत्वा पार्वत्या अवस्था सुतरां दुःसहा बभूव । विरहे भूयो भूयो मूर्च्छन्त्या उत्थायोत्थाय निपतन्त्याश्च पार्वत्याः कातरामवस्थां तस्याः सखी दक्षयज्ञविध्वंसकं शिवमुपगम्य तं निवेदयामास । तदेतद्वर्णनमेकस्यामष्टपद्यां द्वयोश्छन्दसोश्च विद्यते ।

सप्तमः सर्गः

रात्रौ चन्द्रोऽभ्युदितोऽस्ति । चन्द्ररश्मयः पार्वत्याः कृतेऽसह्या भवन्ति । सा कातरत्वं गता स्वसखीं वदति कामज्वरपीडिताऽहं शिवमाह्वातुं यां जयां न्ययुजम्, सा जया, स च हरो द्वावपि मे दुर्विदग्धेन भाग्येन समक्षं नागच्छताम् । अत्र पार्वती स्वयमेकयाष्टपद्या, त्रिभिश्छन्दोभिश्च स्ववेदनालापान् व्याहरति ।

शिवमनीत्वैव सखी न्यवर्तत । अधोमुखीं तामवलोक्य पार्वती तामूचे । स्वयं त्वं गङ्गया सह रममाणं शिवं दृष्ट्वाऽऽयातासि । इह कातर्यपूर्वकं द्वयोरष्टपद्योश्छन्दस्येकस्मिंश्च गङ्गाशिवयो रतिविलासं पार्वती वर्णयाम्बभूव ।

अष्टमः सर्गः

अथ प्रभाते उमा शिवमुपजगाम । तां दृष्ट्वा शिवो ललज्जे । तन्नयने रात्रौ कृताद्विलासजागरणान्मिलती समभूताम् । सः क्षीब इव स्खलन्त्या वाचानुनय-

विनयैरुमां प्रसादयितुं प्रायतत, परन्तु क्रुध्यन्ती—उमा तमुपालम्भितुमारेभे। एष उपालम्भोऽष्टपद्यामेकस्यां छन्दसि चैकस्मिन् वर्णितोऽस्ति।

नवमः सर्गः

पार्वती शिवमुपालभ्य पुनर्मानं विधायाऽऽजगाम। परन्तु प्रसन्नताकोपयोः शिवं प्रति तदन्तःकरणमनुरागेण दोलायमानमास्त इति तथ्यमिदं जानन्ती जया पार्वतीं न्यवेदयत्—"उमे! व्यर्थं विलापं व्यथां च मा सहस्व, पुरारिस्त्वां प्रति तामेव कृपामावहति, त्वं स्वमानं जहीहि, तं प्रति प्रणयं च प्रदर्शय।" जयया पार्वतीं निवर्तयितुं कृतमेतन्निवेदनमेकस्यामष्टपद्यां छन्दसि चैकस्मिन्नास्ते।

दशमः सर्गः

जयायाः प्रयत्नैः शिवपार्वत्योः पुनर्मेलनं बभूव। कामजन्यानन्दतरङ्गेषु निमज्जतोः पार्वत्याः स्तनकलशयोः स्वकपोलं विश्राम्य शिवोऽत्यन्तं चाटुपूर्णया वाण्या पार्वतीं प्रसादयितुमारभत—"प्रिये, त्वं मे मनस्त्वमक्षिणी, त्वं मम प्राणाः अमृतनिष्यन्दिन्या स्वकटाक्षदृशा स्वसेवकमिमं तर्पय" इत्यादि। एकस्यामष्टपद्यामष्टसु च्छन्दःसु च शिवस्यायमुमां प्रति कृतोऽत्यन्तमेव सरसो वाग्विलासो वर्तते।

एकादशः सर्गः

यद्यपि शङ्करो बहुशस्तामनुनिन्ये, परन्तु पार्वती स्वमानं नात्याक्षीत्। मालामिव म्लानां पार्वतीं तदा तस्याः सखी प्रबोधयितुमारेभे—"उमे! स्वचरणशरणागतं शिवं प्रति त्वं कुटिला माभूस्तदन्तःकष्टं दूरीकुरुष्व" सख्यास्तदिदमवबोधनमेकस्यामष्टपद्यां छन्दसि चैकस्मिन् वर्णितमास्ते। पार्वती मानं तत्याज। विजया तां कैलाशगुहां निकषा निन्ये, शिवमभिवीक्ष्य पार्वती कामलज्जिता बभूव ततो विजया तां शिवेन सह कुसुमलताच्छादितायां कैलाशभूमौ विलासं कर्तुमुपदिदेश। सैषा शिक्षैकस्यामष्टपद्यां छन्दसि चैकस्मिन् वर्तते। पार्वती गुहाभ्यन्तं मन्दकटाक्षैर्मन्दां वाणीं व्याहरन्ती व्रीडया बिभ्यती प्रविवेश। तदनु स्वेष्टतहरं सा चुम्बनाधरक्षतमानन्दभरनिर्भरेणान्तःकरणेन च ददर्श। अस्य दर्शनस्गानमेकस्यामष्टपद्यां द्वयोश्छन्दसोश्चास्ते।

द्वादशः सर्गः

सकटाक्षवीक्षणैरात्मगतान् कामभावान् प्रकटयन्ती, शनैः शनैः शयनस्थलं प्रति स्वचरणौ विन्यस्यन्ती, सानुरागा, शिवस्यादेशस्य प्रतीक्षाभावं प्रकटयन्ती च पार्वती शिवं निवेदयामास—"भवच्चरणकमलसेवायामहमुपस्थिताऽस्मि, त्वं मे स्वविलासं प्रदाय कृतार्थयस्व।" शिवं प्रति रतिविलासनिवेदनात्मकमेतद्गानमेकस्यामष्टपद्यामास्ते, तथा च षट्सुच्छन्दःसु रतिविलासस्य वर्णनं विद्यते। ततो विलासानन्दनिर्भरा पार्वती शिवं स्वशृङ्गाररचनार्थं प्रार्थयामास। तदनन्तरं शिवः स्वहस्तेन पार्वतीप्रसन्नार्थं तस्याः शृङ्गारिकविविधवस्तुसमूहैः सर्वविध शृङ्गारं विरचयामास। तैरेतैः सर्वैः सम्पूर्णं कथावस्तु खल्वलौकिकयोः प्रकृतिपुरुषयोर्विलासे परिणतं भूत्वा तं दोषं परिहरति यो हि जगतो मातापितृस्वरूपयोः शिवपार्वत्यो रतिवर्णनात्सम्भवति। सोऽयमुपक्रमोऽष्टपद्यामेकस्यामेकस्मिंश्छन्दसि च वर्तते।

अन्ते कविः छन्दस्त्रये स्वकाव्यस्योत्कृष्टत्वं विनिवेदितवान्।

प्रत्येकं सर्गान्ते शिवपार्वत्योः प्रणयव्यापारस्य कस्याश्चापि घटनायाश्चमत्कारकं वर्णनं कविकृताशीर्वचनरूपे विद्यते।

प्रस्तुतं काव्यम्

संस्कृतभाषाया वाङ्मयमत्यन्तं सुविशालं वर्तते। तस्मिंल्लौकिकस्य साहित्यस्य विधा, काव्यस्य स्वरूपञ्च सरलं, सरसं, मनोहरं चास्ते। अनेनैव कारणेन सहृदयः सुधीसमाजस्तामिमां विधां प्रति त्वरितमाकृष्टो भवति। अस्य (लौकिकस्य संस्कृतसाहित्यस्य) विवेचनार्थं विश्लेषणार्थञ्च संस्कृतभाषायामुच्चकोटिकाः समीक्षात्मका अनेके ग्रन्था लिखिताः सन्ति। ग्रन्थेष्वेषु लेखकैरेतेषां काव्यस्य तथा तद्भेदोपभेदानां वर्णनं महता पाण्डित्यपूर्णेन प्रकारेणाक्रियत। काव्यस्य भेदस्यैकस्य दृश्यकाव्यस्य विषयमधिकृत्य दशरूपकं, नाट्यदर्पणस्तथा च नाटकलक्षणरत्नकोषसदृशाः स्वतन्त्रा ग्रन्थाः समलिख्यन्त। सत्यप्येवं महाकविना जयदेवेन प्रवर्तितस्य 'रागकाव्यस्य' विवेचनविषयेऽलङ्कारशास्त्रस्य प्रायेण सर्वेऽप्याचार्याः सर्वथा मौनमेवाललम्बिरे।

प्रस्तुता कृतिः 'रागकाव्यं' विद्यते, महाकवेर्जयदेवस्य 'गीतगोविन्दस्य'[१] परम्परायां लिखितमास्ते । कविरसावेतद्ग्रन्थारम्भे सहर्षं स्वीकृतवानास्ते । नायमस्यार्थो भवति यत् प्रस्तुतं काव्यमनुकरणात्मकत्वेन मौलिकतया रहितं सर्वथास्तीति । संस्कृतस्य सर्वेऽपि कवयः प्रसिद्धेः, प्रचारप्रसाराभ्यामात्मविज्ञापनाच्च दूरे तिष्ठन्तः कस्मिन्नपि विषये लेखनात् पूर्वं तद्विषयाऽध्ययनेऽनुशीलने, मनने, चिन्तने, विश्लेषणे, विवेचने च निष्ठापूर्वकं पर्याप्तं समयमुपायुञ्जन्, तदनन्तरमेव ते स्वविचारधारां लिपिबद्धं कर्तुं सम्पूर्णेनात्मविश्वासेन लेखनीमुदस्तम्भन्त । इदमेव हि कारणं यद्धि संस्कृवाङ्मये निम्नस्तरीयं साहित्यं प्रायेण नो वर्तत इव । सेयं संस्कृतभाषायास्तस्या लेखकानाञ्च महती हि विशेषता विद्यते तत एव तदिदं काव्यमनुकरणात्मकमपि सन्मौलिकीभिर्भावनाभिः कोमलकान्तपदावलिभिश्चोतप्रोतं वर्तते खलु । काव्यस्यास्याध्ययनेन प्रतीयते यदस्य कवेर्भाषायामधिकारो निस्सीमोऽस्ति । काव्यस्यास्य प्रत्येकसर्गस्य वर्णनं पाठकस्य मनो रससिक्तं विधत्ते । कस्यापि भावस्याभिव्यक्तेः शक्तिः कवेरस्य प्रतिभाजन्यास्ते ।

काव्यस्यास्य संघटनया तथा च द्वादशसर्गेषु विभाजनस्य परम्परयेदं प्रतिभाति यदस्य प्रणेता (लेखकः) तदिदं काव्यं महाकाव्यकोटौ परिगणयितुमिवेच्छति । सम्पादकस्य सविधे प्राप्तयोर्द्वयोर्हस्तलिखितयोः प्रतिलिप्योरेकस्यां सर्गस्यान्ते महाकाव्यशब्दस्य प्रयोगोऽप्युपलभ्यते, यमहं पाठभेदे समुदलिखम् । परन्तु किमपि काव्यं द्वादशसु सर्गेषु लेखनेनैव महाकाव्यं भवितुं नार्हति । महाकाव्यस्य यानि वैशिष्ट्यानि भवन्ति, न तान्यत्रोपलभ्यन्ते । आचार्यैर्निर्धारितानि महाकाव्यस्य लक्षणान्यप्यत्र काव्ये पूर्णतया न घटन्ते । तस्मान्मम व्यक्तिगतायां सम्मतौ काव्यमिदं महाकाव्यमिति कथनं सर्वथाऽनुचितं स्यात् । आम्, वयमेतत् काव्यं भावनाप्रधानं लघुकायं रागकाव्यं वक्तुं पारयामः । कविरसौ रागकाव्यस्यास्य प्रारम्भो महता नाटकीयेन प्रकारेणाकरोत् । सर्वादौ स गीतमेकं

१—औत्सुक्यादहमधुना तथाऽनुकुर्वे,
लालित्यं कविजयदेवभारतीनाम् ॥
—प्रथमसर्गः, पृष्ठम् १ ।

ललितरागे विघ्नहरणस्य भगवतो गणपतेर्वन्दनायां लिखितवान् । तदनन्तरं कविर्द्वितीये गीते शङ्करस्य भगवतो विराट्स्वरूपस्याष्टमूर्तेर्वर्णनं चकार । तदेतद्वर्णनं जयदेवस्य दशावतारवर्णनसदृशं सरसमाकर्षकञ्च विद्यते । अतः परं भूमौ चेतनाऽचेतनजनानां मानसान्दोलनसमर्थस्य ऋतुराजस्यागमनवर्णनेन कथारम्भं प्रकुरुते —

"सरसरसालकुसुममञ्जरिकामधुपिञ्जरितदिगन्ते ।
स्मरसृणिकिंशुकलग्नविरहिजनकालखण्डनिभवृन्ते ॥
विहरति पुररिपुरिह मधुमासे ।
रमयति सुररमणीरधिकं प्रतितरुकुसुमविकासे ॥ ध्रुवपदम्
सरसिजपत्रनिहितमदनाऽक्षरनिकरोपमितमिलिन्दे ।
कुण्ठितयुवतीहृठकलकण्ठरवाऽहितयुववृन्दे ॥
फुल्लतमालनिवहतिमिरापहकृतकुरबकसुमदीपे ।
केसरबकुलगन्धबन्धुरे ह्लीनतविकुसुमनीपे ॥"

—प्रथमसर्गः, पृष्ठम् ५ ।

अथ काव्यस्यास्य सर्वाण्यपि गीतानि तथा च कथायोजकानि समस्तानि च्छन्दांस्यप्यनेनैव प्रकारेण समासयुक्तानि तथा क्वचित् क्वचिदसमस्तान्यलङ्कृतशैल्या लिखितानि वर्तन्ते । गीततुलनायां छन्दःसु कविरसौ समासयुक्तां पदावलिं न्यूनं प्रयुयोज । अलङ्कृतशैल्यां लिखितस्याप्यस्य काव्यस्य भाषा प्रवाहपूर्णा प्राञ्जला प्रसादगुणमण्डिता च वर्वर्ति । इदमेव हि कारणं यदालङ्कारिकाणां कवीनां कलात्मककृतीनामिव प्रस्तुतं काव्यं पाठकानां कृते दुरूहन्नास्ति ।

संस्कृते भाषाप्रयोगस्य स्वकीयैका परम्परा विद्यते । संस्कृतभाषायाः पूर्ववर्तिनां कवीनां भवभूतिमुरारिराजशेखरबाणमयूरश्रीहर्षादीनां भाषा कलात्मिका, शब्दविन्यासैस्तथा च गौडीरीतिद्योतिकया पदावल्या परिपूर्णाऽस्ते । सोऽयं दोषोऽस्मिन् रागकाव्येऽपि च वर्तते । परन्तु नायमस्यार्थो यदुत्तरवर्तिनां

कवीनां कृतिरिव काव्यमिदं दुरूहमस्तीति प्रत्युत एतत् विपरीतमतो गीतान्यस्य माधुर्यगुणपूर्णानि तथा नरनारीणां विभिन्नानां मनोगतानां भावभङ्गीनां चित्रणैरोतप्रोतानि सन्ति। अमीषां भावभङ्गीनामभिव्यक्तिं विधातुं कविरयं भगवन्तं शिवं शङ्करं, मातरं पार्वतीं चाललम्बे। मानवमनसो विभिन्ना भावना लेखकोऽसौ प्रत्येकस्मिन् गीते महत्या शिष्टतया जागरूकतया च प्रकटीचकार। इत्थं विधैरेव भावैः परिपूर्णस्य गीतस्यैकस्य कोऽप्यंशः पठ्यताम्—भगवतः शङ्करस्य गले समावेष्टितां गङ्गामालोक्य जगन्माता पार्वती नारीजनसुलभयेर्ष्यया, रोषेण चोद्वेलिता भूत्वाऽपजगाम। शङ्करो भगवान् पार्वतीं तां प्रसादयितुमनुनयं विनयं च कुर्वन्नास्ते —

"रम्यसेऽप्यरुण्यसेऽपि च नम्यसेऽपि भवानि !
एहि देहि च दर्शनं कुरु चाटुकानि नवानि ॥
क्वाऽसि साहसिके ! विहासकशीलतामपहाय ।
जीवयोरसि हेमकुम्भनिभौ कुचौ विनिधाय ॥
मन्तुमर्हसि मन्तुमेतमुमे ! न मे कदाऽपि ।
एवमाचरिताऽस्मि मानिनि ! दास एष सदाऽपि ॥"

—तृतीयसर्गः, पृष्ठम् १४।

कविरयमत्र कियन्मर्मस्पर्शिनीं, प्रसादगुणपूर्णां, प्रसंगानुकूलां, संवादमूलाञ्च शब्दावलीं प्रयुयुजे !

गीतिकाव्ये सत्यपि प्रबन्धकाव्यस्येवास्य काव्यस्य समस्तमपि कथानकमेकसूत्राबद्धमास्ते। पठनसमये पाठकस्य कथाभङ्गस्याभासो न भवति। तदिदं कविकर्मकौशलं तथा च तत्प्रतिभायाश्चरमा परिणतिरिति वक्तुं युज्यते। एतदर्थं कविरसौ गीतस्य मध्ये कथायोजकानां सशक्तानां च छन्दसां प्रयोगं महत्या कुशलतया कृतवान्। अन्यानि प्रबन्धकाव्यानीव प्रस्तुता कृतिरन्तर्द्वन्द्वगर्भाघटनाप्रधाना सत्यपि भावुकतामूला भावप्रधाना चास्ते। अत एव हि यदा कदा कविरयं भावुकताया वशी भूत्वा तत्र किलैतावत्तल्लीनो भवति यत्तस्यैतस्य

तथ्यस्य ज्ञानं विस्मृतिमपयाति यदियं प्रस्तुता कृतिर्जगन्मात्रा पार्वत्या, जगत्पित्रा भगवता शङ्करेण च सम्बद्धा वर्तत इति। अतो विपरीतं कविद्वाराऽधिकांश-स्थलान्येवंविधानि चित्रितानि सन्ति यथाविधानि साधारणे नरकाव्ये प्राप्यन्ते। अत्यन्तं गतिशीलाया अष्टपद्या एकस्याः कश्चनांशो विलोक्यतां तथा रेखाङ्कितस्य पदस्यार्थः प्रत्यवधीयताम्—

"नन्दापुलिने मृगमदमलिने सुररमणीरमयन्तम्।
पश्य विभावैरीरितभावै रतिपतिमपि नमयन्तम्॥
अलकोपवने शीतलपवने विहरति सति स कपर्दी।
अरिकरिकुम्भविबुधवनिताजन-पीनस्तनपरिमर्दी ॥ ध्रुवपदम्
धवलं वसनं सितनिशि सखि! परिधेयम्।
किङ्किणिकास्ये नवरवलास्ये मृगमद रज इह परिधेयम्॥
सति रतिकाले लास्यसि बाले! स्फटिकगिराविव शम्पा।
पुरहरहृदये रतिरणविदये पुरुषायितधृतकम्पा॥

—पञ्चमसर्गः, पृष्ठम् २२।

तदिदं भावनाभावुकतयोरेव प्रभावो वक्तुं युज्यते यदत्र कविर्मातरं पार्वतीं सामान्यनायिकामिव ज्योत्स्नावत्यां रात्रौ श्वेतवस्त्रधारणमुपदिशति तथा च साकमेवानेन तां पुरुषायितधृतकम्पामित्यनेन विशेषणेनालङ्करोति च। नेदमेव, क्वचित् क्वचित् कविरसौ मातुः पार्वत्या विरहे भगवन्तं शङ्करं नार्या वियोगे प्रलपन्तं विलपन्तं साधारणं मानवमिवाचित्रयत्। भगवाञ्छङ्करः पार्वत्या वियोग एतावद्भावविह्वलो भवति यत्तस्य चेतनाचेतनयोरपि पदार्थयोर्ज्ञानं न भवति। वर्णसाम्यश्चन्द्रमसः किरणेषु पार्वत्या भ्रमो भवति स चोन्मत्तो वियोगी पुरुष इव रोदितुमारभते—

"क्षिपति स शयनं दिशि दिशि नयन्नयति भवान्यविरामम्।
श्वसितन्तनुते नर्म न मनुते ननु ते स्मरति निकामम्॥

वहति च कोऽहं क्षणमिति मोहं वियदालिङ्गति बाले ! ॥
भ्रममयभवतीशतसताऽद्भुतभूमिमकाले ॥
बहु हा रावं ज्ञपयति भावं जड इव भवति कदाचित् ।
सुरनरदानवनवललना न शिवं सखि ! सुखयति काचित् ॥"

—पञ्चमसर्गः, पृष्ठम् २५ ।

नैतावदेव, क्रोधाग्निना क्षणमात्रेण कामदेवं भस्मसात् कर्तुं समर्थो भगवाञ्छङ्करो मातुः पार्वत्याः सौन्दर्यं प्रत्येतावन्मुग्धो भवति यद्धि त्वमेव मम सर्वस्वम् !' इत्युक्त्वा सृष्टिसंहारकारकः शङ्करः स्वात्मानं पार्वत्या भृत्यमुद्घोषयति । सोऽयं कवि कल्पनायाश्चमत्कारः—

"मम मनोऽसि प्रिये ! चक्षुरसितनुरसि प्राणपञ्चकमसि सत्यम् ।
वदनमुन्नाम्य पीयूषरसवर्षिणा लोचनेन स्नपय भृत्यम् ॥"

—दशमसर्गः, पृष्ठम् ३९ ।

मातुः पार्वत्याः कज्जलाञ्चिते सजले नयने दृष्ट्वा शङ्करस्य भगवतो हृदि भ्रान्तिर्भवति यत् कदाचित् चन्द्रमा रात्रौ नन्वन्धकारमापीय तदुद्गिरतीव—

"कज्जलश्यामलितमश्रुविस्रुतमिदं वहति सुमुखी दृगमुपमानम् ।
आगलन्निशितमिस्रन्निपीयाशु किं चन्द्र उद्गिरति तदमानम् ॥"

—दशमसर्गः, पृष्ठम् ३९ ।

एवमेव नैषधकारस्य महाकवेः श्रीहर्षमिश्रस्य क्लिष्टकल्पनाभिरिव जटिल-कल्पनाभिः परिपूर्णानि स्थलान्यस्मिल्लघुकलेवरे काव्येऽनेकानि वर्तन्ते ।

रामभट्टमहोदयः सफलः कविरास्ते । तस्याऽस्मिन् काव्ये भावपक्षः कलापक्ष-श्चेत्युभावपि स्थाने-स्थाने पूर्णरूपेण मुखरितौ स्तः । भट्टमहाभागोऽसौ प्राधान्यतः शृङ्गाररसस्य कविर्विद्यते । स हि शृंगारे विप्रलम्भस्य तथा च तद्भेदोपभेदानां कुशलोऽस्ति चित्रकारः । यदि च तेन प्रयत्न आरभ्येत चेत्तदाऽस्मिन् काव्ये विप्रलम्भस्योत्तमोत्तममुदाहरणमुपलभ्येत । जयदेवकवेर्गीतगोविन्द इवास्मिन्

रागकाव्येऽपि चोत्कण्ठिता, प्रोषितपतिका, वासकसज्जा, विप्रलब्धा, खण्डिता, कलहान्तरिताभिसारिकादिनायिकानां तथा चिन्ता-मरण-व्याधि-आवेग-असूया-दैन्यप्रभृतीनामनेकेषां सञ्चारिभावानामुदाहरणान्यतिसरलतयोपलभ्येरन् । वात्स्यायनस्य कामसूत्रस्य शैल्याः कचाकर्षणचुम्बनरतिक्रीडानामपि वर्णनमत्र काव्ये प्राप्येत अस्मिन्नेव भ्रमावर्ते निमज्जन्नसौ कविरत्यन्तं विवेकविहीनोऽस्ति संजातस्तथा सः श्लीलताऽश्लीलते चाणुमात्रमपि नावदधे । काव्येऽस्मिन् कानिचित् स्थलान्यत्यन्तमश्लीलानि सन्ति । तेषामत्रानुद्धरणमेव श्रेयस्करम् । मम व्यक्तिगते मते मातुः पार्वत्यास्तथा जगत्पितुः शङ्करस्य सम्बधेऽश्लीलतापूर्णं चित्रणं कविना न कदापि करणीयमुचितमभूत् । देवकाव्ये नरकाव्ये चान्तरं भवति । प्रस्तुतं काव्यं देवकाव्यस्य कोटावापतति । देवकाव्ये नरकाव्यसदृशं मर्यादाविहीनं वर्णनं कर्तुं न शक्यते । संस्कृतभाषायाः सर्वाणि प्रहसनानि भाणादीनि च सामाजिकानि वर्तन्ते । तान्यहं नरकाव्यविधान्तर्गतानि मन्ये । इत्थं विधासु कृतिषु यच्छ्लीलता भवेत्तदा सा क्षन्तव्या भवति । इदमेव हि कारणं, यत् संस्कृतस्य समस्तानि प्रहसनानि भाणादीनि च प्रायेणात्यन्तमश्लीलानि विद्यन्ते । तेषां सामाजिकत्वेनाचार्यैस्तानि नानुचितानि अमन्यन्त जनसमाजस्य समक्षं सामाजिकं दौर्बल्यमुपस्थापयितुं साहित्यकारद्वारा यथार्थवादिचित्रणं नाम नापराधः । यथार्थवादस्याश्लीलतायाश्चान्योऽन्याश्रितोऽस्ति सम्बन्धः । यत्र यथार्थवादस्तत्राश्लीलता, यत्र चाश्लीलता तत्र यथार्थवादस्यास्तित्वं ध्रुवम् । अवश्यमेवैतादृक् साहित्यमादर्शवादिनां दृष्ट्या, विचारेण च सुन्दरतः परं सिद्ध्येत् । अस्मिन् हि रागकाव्ये सुन्दरमुपेक्षमाणाऽश्लीलता प्राप्यते । [१]सैषा स्थितिः कतिचित्सु स्थानेष्वेवास्ते । काव्यस्यास्याधिको भागः शृङ्गाररसस्य सीमान्त एव वर्तते । संस्कृतसाहित्ये कविभिर्घनघोरशृङ्गारसिक्तानां काव्यानां लेखनस्य परम्परा प्रचलितासीत् । योगिराजो भर्तृहरिसदृशः कविरपि पद्धत्यानया प्रभावितोऽभूत् । अस्य कवेः

१—चलदलदलजित्वरत्वरमंगमुपानयमुपनय मह्याम् ।
मृदुनिधुवनमधुना विदधे मम साहसमिदमिह सह्याम् ॥
—द्वादशसर्गः, पृष्ठम् ५० ।

शृङ्गारशतकमस्योदाहरणमस्ति । तत्कालीने समाजे लोकप्रिययानया परम्परया भक्तजनानां दृशाऽऽध्यात्मिको ग्रन्थः श्रीमद्भागवतमपि चास्पृष्टन्न बभूव । [१]तस्य दशमस्कन्धे गोपिकाभिः सह भगवतः श्रीकृष्णस्य जलक्रीडायास्तथा रासक्रीडाया वर्णनमतीव हृदयग्राहि विद्यते । परम्पराया अस्या उदात्तं विकसितञ्च रूपं कविवरस्यामरुकस्यामरुकशतकस्य व्यङ्ग्यात्मकेषु मुक्तकेषूपलभ्यते । तामेव परम्परामवलम्ब्य महाकविर्जयदेवो रससिक्तं काव्यं गीतगोविन्दं प्रणिनाय । तत एव केषांचित् समालोचकानां मतमिदमास्ते यज्जयदेवस्य गीतगोविन्दमपि मौलिकं नास्तीति । तद्धि पूर्वनिर्धारितायाः शृङ्गारिक्याः वर्णनपरम्परायाः अनुकरणमात्रमास्ते । जयदेवः संस्कृतकाव्यं संगीततानमध्युपावेश्य साहित्यसंगीतयोरपूर्वं समन्वयं चक्रे । इयमेव हि जयदेवस्य प्रतिभायाः मौलिकता नवीनता चास्ते । अतो यदि महाकविर्जयदेवः संस्कृते गीतिकाव्यस्यैकमात्रप्रवर्तकः प्रोच्येत, तदा नानुचितं स्यात् । अनया दृशा जयदेवस्य गीतगोविन्दस्यानुकरणे लिखितं रामभट्टस्य गीतगिरीशम्—नाम रागकाव्यमपि सफला कृतिरास्ते ।

संस्कृतभाषायामेकमाभाणकमस्ति—'शास्त्रेषु भ्रष्टा कवयो भवन्ति ।' परन्तु रामभट्टोऽस्यापवादोऽभूत् । कवेरस्य विभिन्नानां शास्त्राणां सम्यग्ज्ञानमासीत् । व्याकरणशास्त्रस्याध्ययनं त्वस्यात्यन्तं गम्भीरमासीत् । अत एव हि काव्येऽस्मिन् व्याकरणगतैः प्रत्ययैर्निर्मितानां शब्दानां क्रियाणाञ्च प्रयोगं कविरसौ सुदृढतया चकार ।

रागकाव्यस्य प्राणा माधुर्यम् । एतद्विना पाठकस्य श्रोतुश्च द्वयोरपि तनुमनसस्तरलीकरणस्य सरलीकरणस्य च क्षमता गीतेषु नावशिष्यते । तद्धितप्रत्ययान्तानां शब्दानां प्रयोगेण रागकाव्ये माधुर्यस्य सृष्टौ बाधा भवति । कारणम् ? तद्धितप्रत्ययेन निर्मिताः शब्दाः सरलतयोच्चरिता न भवन्ति । शब्देष्वेषु किमपि कठोरत्वं

१—बाहुप्रसारपरिरम्भकरालकोरुनीवीस्तनाऽऽलभननर्मनखाग्रपातैः ।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्सम्भयन् रतिपतिं रमयाञ्चकार ॥
—भागवते दशमस्कन्धः । एकोनत्रिंशदध्यायः ।
षट्चत्वारिंशच्छ्लोकः ।

भवति। परन्तु रामभट्टोऽस्मिन् गीत-काव्ये स्वकीयं शब्दशास्त्रीयं वैदुष्यं प्रकटयितुं सौरी[१] हैमवती[२] नैल्य[३] जैह्म्य[४] शारद[५] सौहृद[६] सदृशानां तद्धित-प्रत्ययान्तानां शब्दानां प्रयोगं चकार। अनेनैव प्रतीयते यद्धि रामभट्टो दाक्षिणात्योऽभूदिति। दाक्षिणात्यानां विषये संस्कृतजगति लोकोक्तिरियमत्यन्तं प्रसिद्धा प्रचलिता चास्ते 'तद्धितप्रिया दाक्षिणात्याः'।

व्याकरणशास्त्रस्याचार्यो[७] ह्येको भागुरिर्बभूव। तन्मतेन वगाहः अवगाहः, पिधानम् अपिधानं द्वावप्येतौ शास्त्रसम्मतौ स्तः। संस्कृतस्य वैयाकरणा अव्ययप्रकरणेऽस्य चर्चां चक्रुः। अस्याः पद्धतेः प्रयोगाश्चापिकाव्ये ऽस्मिन् प्राप्यन्ते। 'अवलम्बनस्य स्थाने कविरयं केवलं वलम्बनस्य[८]' प्रयोगं कृतवान् यस्य प्रयोगं कविगणाः प्रायो न कुर्वते। परन्तु रामभट्टः स्वपाठकेभ्य आत्मनो विद्वत्तायाः प्रभावमर्पयितुमेवंविधानप्रसिद्धान् प्रयोगान् निर्भीकतया कृतवान्।

एवमेव काव्येऽस्मिन् कामशास्त्रे प्रयुक्तान् पारिभाषिकान् कामशास्त्रीयान् सुरथा[९]लतावेष्टित[१०]सदृशाँच्छब्दान् प्रयुयोजेत्यपि चोपलभ्यते। न केवलमेतदेव,

---

१—चन्दनमपि तापयति तामतिशरदि द्युतिरिव सौरी। पृष्ठम् १०।

२—हरविरहाकुलहैमवतीसुवचोऽस्तु मनस्यवदाते। पृष्ठम् १७।

३—तत्प्रकटयति बहिर्गलनैल्यनिभेन शितिच्छिजमंशम्। पृष्ठम् ३५।

४—न नति शतैरपि तव सोऽपैतिमनस्तव जैह्म्य निधानम्। पृष्ठम् ४३।

५—रविकरविच्छुरितान्तरशारदमुदिरमिव स्फुटशोभम्। पृष्ठम् ७।

६—शशिसरसीरुहयोरिव सौहृदमघटितमपि घटयान्तरे। पृष्ठम् ५२।

७—वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा॥
अवगाहः। वगाहः। अपिधानम्। पिधानम्।
—सिद्धान्तकौमुदी अव्ययप्रकरणम्।

८—कुचकलशवलम्बनशीलम्। पृष्ठम् १२।

९—सुरथा नखपदततिरतिधवले वपुषि भवस्य सुजाता प्रथमसर्गः पृष्ठम् ७।

१०—चिकुरकर्षणयुतं कुरु लताऽऽवेष्टितकमुरसि रुद्धव्रदिशं गन्तुम्।
—दशमसर्गः, पृष्ठम् ३९।

लेखको ऽसौ शिवस्यार्थे 'वृषभध्वजस्य' स्थानेऽप्रसिद्धस्य [१]'वृषध्वजस्य' सुवर्ण-स्यार्थे 'पुरट'[२] सदृशानामप्रचलितानां शब्दानामपि च प्रयोगं पाण्डित्यप्रदर्शनाय काव्ये ऽस्मिन्नत्यधिकं कृतवान् ।

कविरयं साधारणे जनसमाजे प्रचलितानां लोकप्रियाणां लोकोक्तीनां (आभाणकानां) चापि प्रयोगमस्मिन् काव्ये भूयो भूयो विदधे । एकं वा द्वे वोदाहरणे दृश्येताम्—

"स्रोत इवैति गतन्न वयः पुनरूनितमृदुकिरणाऽऽस्ये ।
भज भवमङ्गवनानि कौमुदीमदहरमोहनहास्ये ॥"

—पञ्चमसर्गः, पृष्ठम् २१ ।

"त्वामधिचन्दनवनमियमन्यभृताऽऽह्वयतीव सुलब्धम् ।
क्षणकरणीये कर्मणि तरुणि प्रकरिष्यसि नु किमब्दम् ॥"

—एकादश सर्गः, पृष्ठम् ४३ ।

हिन्दीभाषायामेकमाभाणकमास्ते 'यद्धस्तिनो दन्ताः प्रदर्शनायान्ये भवन्ति चर्वणाय चापरे' इति । तदिदमाभाणकं कविरसावत्र काव्येऽतीव रोचकप्रकारेण प्रयुयोज—

"अनुकलमनुरागन्तस्य दूति ! ब्रवीष्य-
प्रकटकपटमस्य त्वन्नजानासि नूनम् ।
बहिरिह करिणो यान् दर्शयन्ति स्वदन्तान्
भवति खलु ततोऽन्या चर्वणार्था रदाली ॥"

—सप्तमसर्गः, पृष्ठम् ३४ ।

संस्कृतसाहित्ये किलोत्तरवर्तिथुः कविषुर्गर्वोक्तिलेखनस्य परम्परा प्रचचाल । पूर्ववर्तिनः कविकालिदासादयो यत्र 'मन्दः कवियशः प्रार्थी' लिखित्वा स्वकीयां

१—विहरन्तीषु रतिप्रतिबिम्बतनुषु वृषध्वजचित्तम् । पृष्ठम् ७ ।
२—पुरटरशनामित्युक्तः श्रीहरोऽपि तथाऽकरोत् । पृष्ठम् ५३ ।

विनम्रतां, विनयशीलताञ्च प्राचीकटँस्तत्रैवोत्तरवर्तिनः कवयो राजशेखरादय स्वात्मानं[१] वाल्मीकेरवतारं घोषयामासुः । तदनन्तरं तु संस्कृते ओजस्विन्यां भाषायां कवयो गर्वोक्तीर्लिखितवन्तः । तेषु प्रसन्नराघवनाटकस्य जयदेवस्य, नैषधकारस्य श्रीहर्षस्य, रसगङ्गाधरप्रणेतृपण्डितराजजगन्नाथादीनां गर्वोक्तयः संस्कृतजगति सुतरां सुप्रसिद्धाः, सुप्रचलितास्तथा प्रत्येकसंस्कृतविदुषां कण्ठस्था विराजन्ते । एतेषां सर्वेषां गर्वोक्तिषु भाषाचमत्कारस्य तथाऽहङ्कारस्य चान्तिमा परिणतिर्दर्शनीया पठनीया चास्ते । अस्यां हि दशायां प्रस्तुतकाव्यस्य लेखको रामभट्टो ननूत्तरवर्तिनां संस्कृतकवीनां परम्परयानया प्रभावितो भवेदिति स्वाभाविकम् । अस्य परिणामोऽसौ बभूव यदयमपि च स्वात्मानं कविनृपतिरूपमुद्घोषयितुं विवशो बभूव तथा स्वस्य मुखचन्द्रान्निर्गताया वाण्यां पृथिव्यां पण्डितमण्डल्यं सुधेव सुखदायिनी क्षमता प्रतीयाय । न केवलमेतावदेवाऽपितु स्वकवितायामिक्षुशर्करादीनां माधुर्यतिरस्कारकारिण्याः शक्तेरभिव्यक्तेराभासो बभूव । एतासां गर्वोक्तीनामानन्दमपि च पाठका अनुभवन्तु—

"कविनृपतिरामजिह्वदनचन्द्रच्युताभूविबुधसुखकरसुधेयम् । "

—दशमसर्गः, पृष्ठम् ४० ।

"श्रीकविरामभणितमतिसुन्दरगिरिजोद्यमनसुगीतम् ।
ऐक्षवमधुमाकन्दसिताऽऽमृतरसमधुरत्वमतीतम् ।।"

—दशमसर्गः, पृष्ठम् ४४ ।

गीतमय्या गर्वोक्तेरानन्दानुभवादनन्तरं कविकृतायाःश्लोकमय्या गर्वोक्तेरप्यानन्दोऽनुभूयताम्—

"मधु ! विधुतमसि त्वं खण्ड ! ते खण्डतास्तात्,
सरक ! नरकमेव त्वं त्वमिक्षो ! क्षुरोऽसि ।

१—बभूव वल्मीकभवः कविः पुरा, ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेखया, स वर्तते सम्प्रति राजशेखरः ।।

अमृतमनृतमेवास्तु ! प्रियस्वाधरत्वं,
नहि किमधरेमा यद्रामवाचो जयन्ति ॥"

—द्वादशसर्गः, पृष्ठम् ४४ ।

कविरयं यावद् गीतरचनायां निपुणः कुशलश्चास्ते ततोऽपि बह्वधिकं प्रसिद्धेष्वप्रसिद्धेषु वृत्तेषु सफलतापूर्वकं श्लोकप्रणयनेऽपि च सिद्धहस्तोऽस्ति । तदिदं तथ्यं काव्यस्यास्य गीतानां मध्ये मध्ये प्रयुक्तैः कथायोजकैश्छन्दोभिः सुस्पष्टं प्रतीयते । कविनास्मिन् काव्ये विभिन्नविधानांच्छन्दसां प्रयोगो महत्या कुशलतया विहितोऽस्ति । तेषु 'मालभारिणी' सदृशान्यप्रसिद्धान्यपि वृत्तानि वर्तन्ते । छन्दसाममीषां भाषा गीतभाषेवात्यन्तं प्रौढा, प्राञ्जला, परिमार्जिता च वरीवर्ति । अनेन कवेर्भाषायामुपर्यक्षयोऽधिकारस्तथा भावानुरूपं शब्दयोजनाया अद्भुता प्रतिभा परिलक्ष्यते । भगवतः शङ्करस्य वियोगे खिन्नचेतसः पार्वत्या मानसिकस्यान्तर्द्वन्द्वस्य मार्मिकेण प्रकारेण सजीवं चित्रणं पाठकानां समक्षमुपस्थापकमेकं छन्दोऽवलोक्यताम्—

"याति स्विद्यति खिद्यति प्रलपति प्रत्येति रोमाञ्चति,
ध्यायत्यप्यथ मूर्च्छति प्रपतति भ्राम्यत्यलं ताम्यति ।
उच्चैर्निश्वसिति प्रमीलति पुनः संकम्पते सीत्करो-
त्येवं शर्व ! वियोगिनी न लभते कां कामवस्थां शिवा ॥"

—चतुर्थसर्गः, पृष्ठम् ३ ।

समस्तः श्लोकः क्रियापदानां चमत्कारिण्याः शैल्याः प्रयोगेण मुखरितोऽस्ति । अत्र हि कियत्या कुशलतया कविर्वियोगिन्याः पार्वत्या आन्तरिक्या व्यथायाः कथां तथा च विभिन्नानां सञ्चारिणां भावानां क्रियाकलापान् सार्थक्याः प्रत्येकं क्रियाया माध्यमेनाभिव्याञ्जयत् । तदिदं प्रशस्यं श्लाघ्यञ्च वर्तते । श्लोकेनानेन कवेर्व्याकरणशास्त्रस्य पाण्डित्यमपि स्पष्टरूपेण प्रकटीभवति । इत्थं शब्दानां क्रियारूपे परिणमनस्य क्षमता प्रोद्भटस्य वैयाकरणस्यैवायत्ता सन्तिष्ठते ।

क्रियापदानां चमत्कारिकप्रयोगैःपूर्णाश्चैवंविधाः श्लोकाः प्रस्तुतगीतगिरीश-रागकाव्येऽनेके वर्तन्ते, तेष्वेकं श्लोकमत्राहमुद्धरे--

शिवस्य वियोगे विकलायाः पार्वत्या एकः क्षणोऽपि च कल्प इव प्रतीयते, स्वल्पमप्याभूषणं भाररूपं प्रतिभाति, चन्द्रस्याऽतिशीतला रश्मयश्चापि किलानल-कल्पाः संतापकराः प्रतीयन्ते, कर्पूरस्याणुमात्रमपि लेपो विषमिव दृश्यते, पुष्पमाला सर्प इव तथा कोकिलस्य कोमला कलवाणी चाप्यरुन्तुदा, मर्मच्छेदिनी च दृश्यते। इत्थं विधायां विरहदशायां भगवाञ्छङ्कर एव पार्वत्या विरहाग्निमुपशमयितुं प्रभवति। तथाहि—

"पुटिः कल्पत्यल्पाभरणमपि भारत्यनलति,
प्रसन्नः शुभ्रांशुर्गरति घनसारद्रवलवः।
प्रसूनसृक् सर्पत्यथ पिकरुतं कुन्तति मृदु,
श्रुतौ तस्याः शम्भोः ! शमय विरहाग्निन्नगभुवः॥

--चतुर्थ सर्गः, पृष्ठम् १८।

प्रस्तुतकाव्ये कविः प्रसिद्धानामप्रसिद्धानां सर्वेषामर्थालङ्काराणां, शब्दा-लङ्काराणाञ्च प्रयोगं स्थले स्थले कृतवानास्ते परं तेषु कवेः साङ्गरूपकालङ्कारं प्रत्यतितरां मोहः आकर्षणञ्च विद्यते। अस्य रूपकालङ्कारस्य प्रयोगः कविना काव्येऽस्मिन् बहुषु स्थलेष्वतीवसुन्दरेण प्रकारेण विहितोऽस्ति। तेषु प्रोच्चैःकल्पना-पूर्णानां कतिपयेषां छन्दसामानन्दरसास्वादचर्वणामत्र पाठका आस्वादयन्तु--

पार्वती भगवतः शङ्करस्य वियोगे नन्वेतावद् विकला विह्वला च बभूव यत्सा विवेकविहीना भूत्वा दिवानिशं रुरोद साश्रुगद्गदकण्ठम्। परिणामोऽसौ बभूव यद्धि पार्वत्या नयनाभ्यां निरन्तरं प्रवहन्त्यश्रुधारा नदीरूपे परिणिन्ये। ततः किं वक्तव्यम् ? कविरसौ रामभट्टस्तस्या नद्यास्तटे साङ्गरूपकालङ्कारस्य साहाय्येन पार्वत्याः प्राणानामाहुतिं प्रकल्प्य वैदिकस्य महायज्ञस्य क्लिष्टां परिकल्पनां विदधे। तथाहि--

"वैतानाग्निरसौ वियोगदहनो वेदी ममोरः पिको,
होता यज्ववरो मधुः स शमिता कामः समित् केसरम्।

उद्गाता मधुपोऽत्र चन्दनरसः सर्पिः शिवप्रीतिकृत्,
मत्प्राणैः पशुभिर्भविष्यति महायज्ञोऽश्वनद्यास्तटे ॥"

—सप्तमसर्गः, पृष्ठम् ३१ ।

प्रस्तुते श्लोके कविरयं साङ्गरूपकालङ्कारस्य प्रयोगेण साकमेवात्मानं, स्वपाठकानां समक्षं, वैदिकयज्ञप्रक्रियाणां मार्मिकं ज्ञातारमपि प्रकटयितुं प्रयतते । अन्यथा वैदिकेषु यज्ञेषु प्रयुक्तानां वैतानाग्निवेदीहोतृसमिदुद्गातृप्रभृतीनां पारिभाषिकशब्दानां काव्ये प्रयोगनिर्वाहो नाम न हि सर्वेषां कवीनां सुकरोऽपि-त्वत्यन्तं श्रमसाध्यो भवति ।

अथास्य रूपकालङ्कारस्यैकं वा द्वे वोदाहरणे पुनरपि चावलोकयन्तु पाठकाः । कथमिव कविः स्वप्रतिभाबलेनोमाया नासां नलिकाद्वयोपेतमाग्नेयास्त्रं, तस्यां नासिकायां विराजमानं मौक्तिकञ्च तन्नलिकास्त्रगुटिकामावगच्छति । कवेरस्य कठिनकल्पनासाध्यां तामिमामुद्भावनां प्रशंसेयुरेव सहृदयाः पाठकाः ।

"पाशौ ते श्रवणावपाङ्गतरला दृग्भङ्गयस्ते शराः,
कोदण्डं भृकुटीयुगं गिरिसुते ! नासाऽपि ते नालिका ।
सीमन्तस्तवभल्ल एष च भवद्वक्त्रिमल्लकोऽप्युल्लसन्,
खड्गश्चण्ड्यसि तत्प्रसूनविशिखाऽनेकाऽऽयुधान्येकिका ॥"

—तृतीयसर्गः, पृष्ठम् १४ ।

"उमानासानाली तदुपहितमुक्ता च गुलिका,
वियोगोष्णश्वासोऽप्यनिलमिलनं यो मृगमदः ।
स एवार्कं भस्माऽयसनलकविस्कोटनकरं,
मनोहंसं हंसि ! स्मर मम कथं न द्रुततरम् ॥"

—तृतीयसर्गः, पृष्ठम् १५

अथास्यां प्रस्तुतायां कृतौ कविरसौ रोचकत्वापादनाय पौराणिकीनां गाथानामपि च प्रयोगञ्चकार । पौराणिके जगति तदिदं सुप्रसिद्धमास्ते यद् भगवान् विष्णुरेकसहस्रसंख्याकैः कमलपुष्पैः शिवं शङ्करं भगवन्तं प्रसादयितुं

पूजामर्चाञ्च विधत्ते स्म । संयोगादेकदा कमलपुष्पमेकं न्यूनं बभूव । तथ्यस्यास्य परिज्ञानं विष्णोः पूजासमये समभूत् । पुष्पवाटिका चापि ततो दूरतरासीत् । अस्माद्धेतोरेतावति स्वल्पसमयान्तरे संख्यापूर्तयेऽन्यस्य कमलस्यैकस्य व्यवस्था नैव सम्भवति स्म । विवशतया शङ्करस्याऽनन्यो भक्तो भगवान् विष्णुस्तत्क्षणं स्वकीयं नेत्रकमलमेव महादेवस्य चरणेष्वर्पयामास । अथाऽऽशुतोषो भगवान् शङ्करो विष्णोः कर्मणानेनात्यन्तं प्रसन्नो बभूव, तत्कालमेव हि सुदर्शनचक्रं विष्णवे प्रापयामास यदद्यापि लोकत्रयरक्षणाय विष्णोर्भगवतो हस्ते विराजमानं शोभते । तामिमां पौराणिकीं कथामन्वत्यन्तमनुप्राणितोऽस्य रागकाव्यस्य श्लोक एकः प्रपठ्यताम्—

"उत्कीर्य स्वदृशन्नखेन सहसा सम्पूरयत्यच्युते,
साहस्रं सकृदूनमम्बुजबलिं शम्भोः सपर्यार्थकम् ।
आश्चर्यं यदभूदुमामनसि तद्भूयोऽपि संवर्द्धयन्,
सद्यः श्रीशदृगर्पणात् दिशतु वः श्रीशङ्करः सम्पदम् ॥"

—नवमसर्गः, पृष्ठम् ३८ ॥

श्लोकस्याऽर्थज्ञानाय पाठकानामुपर्युक्तायाः पौराणिक्या गाथायाः पूर्णरूपेण परिचयोऽस्त्यावश्यकः । कथाया अस्याः पौराणिक्या ज्ञानं विनास्यार्थाविबोधः कठिनः । सोऽयं श्लोकोऽपि च श्रीपुष्पदन्तविरचितस्य महिम्नः स्तोत्रस्य श्लोकेनैकेन प्रभावितोऽस्ति—

"हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन् निजमुदहरं नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा,
त्रयाणां रक्षायै त्रिपुरहर ! जागर्ति जगताम् ॥"

—महिम्नः स्तोत्रम्, श्लोकः १९ ।

अथ च मध्यकाले संस्कृते समस्यापूर्तेः परम्परा प्रचचाल । राज्ञां राजसभासु, जायमानेषु कविसम्मेलनेषु च समस्यापूर्तिर्नाम कवीनां स्वबैदुष्यस्य, काव्यरचनाविषयिण्याः प्रतिभायाः प्रकाशनस्य तथा प्रदर्शनस्य चैकं साधनं बभूव । समस्या-



[भाण्डारकरशोधसंस्थानपुण्यपत्तनस्थहस्तलिखितपुस्तकस्यान्तिमपृष्ठस्य प्रतिच्छविः]

पूर्तिसम्बन्धा एवंविधा रोचका मनोमोहकाश्च प्रसङ्गाः संस्कृतभाषायाः सुप्रसिद्धे पुस्तके 'भोजप्रबन्धे' न केवलमेकोऽपित्वनेके वर्तन्ते खलु। प्रस्तुतं रागकाव्यं गीतगिरीशमपि च परम्परयानयाऽस्पृष्टं चास्ते। प्राप्तेऽवसरेऽसौ कविरपि कथायोजकेषुच्छन्दःसु महत्या वैदग्ध्या, चमत्कारिण्या शैल्या च समस्यापूर्तेः परम्पराया द्योतकं छन्दो निर्ममे। भगवाञ्छङ्करः पार्वतीं कथयति—

"श्यामा त्वं वयसा ब्रवीषि मनसा श्यामञ्च मां सुन्दरि !
श्यामार रात्रिरियन्निकुञ्जभवने श्यामन्तमः सर्वतः।
श्यामन्तीरमिदन्तृणैर्द्रुसरितः श्यामास्तमालैर्दिश
श्यामः कोऽपि रसः करोति मयि तच्छार्दूलविक्रीडीतम् ॥"

—दशमसर्गः, पृष्ठम् ४०।

अत्र श्लोके कविः 'शार्दूलविक्रीडितम्' इति समस्यां मत्वा तेनैवच्छन्दसा रमणीयेन प्रकारेण समस्यापूरणस्य परम्परां निरुवाह। प्रस्तुतेच्छन्दसि कविद्वारा कुशलतापूर्वकं पुनरावृत्तिमूलकस्य श्यामेति शब्दस्य कृतः प्रयोग श्लोकपाठसमये पाठकानां मनस्यपूर्वमानन्दं सृजति। कवेरस्यालङ्कारेषु यथा साङ्गरूपकमलङ्कारोऽतितरां प्रियोऽस्ति, तथैव छन्दस्सु 'शार्दूलविक्रीडितेन' तस्य सविशेषं प्रेमातिशयोऽस्ति। तस्मादेवास्मिन् रागकाव्ये साङ्गरूपकालङ्कारमिव कविरयं 'शार्दूलविक्रीडितस्य' च्छन्दसः प्रयोगं सर्वतोऽधिकं चक्रे। तदनन्तरं शिखरिणीच्छन्दसः प्रयोग उपलभ्यते। काव्येऽस्मिन् रामभट्टः स्वरतालबद्धानां ललितगीतीनां गुम्फने यावत् साफल्यं लेभे तावदेव साफल्यमोजस्विन्या भाषया सशक्तानाञ्छन्दसां विरचनेऽपि प्राप्तवान्।

मन्मते सर्वथा कवेरियं रसभृतिः कृतिः सफला। गच्छति काले कृतिरसावपि जयदेवस्य कवेः 'गीतगोविन्दम्' इवैकदा पण्डितसमाजे शुभादरं सम्मानञ्च प्राप्स्यति।

प्रस्तुतस्य पुस्तकस्य सम्पादनं द्वयोर्हस्तलिखितयोः पुस्तकयोः साहाय्येन विहितमास्ते। अनयोरेकं भाण्डारकरशोधसंस्थानपुण्यपत्तनतः द्वितीयञ्च वाराणसेयसंस्कृतविश्वविद्यालयस्य 'सरस्वतीभवन' पुस्तकालयादाप्यत। पुण्यपत्तनस्य पुस्तकम् 'क' इति तथा वाराणस्याः 'ख' इति संज्ञापिते स्तः।

पुस्तकस्यास्य सम्पादने वाराणसेयसंस्कृतविश्वविद्यालयवाराणसीति प्रतिष्ठानस्य व्याकरणविभागस्य प्राध्यापकात् पण्डितभूपेन्द्रपतित्रिपाठिनस्तथा श्रीसरस्वतीप्रसादचतुर्वेदिनोऽवकाशप्राप्ताध्यक्षात् प्रयागविश्वविद्यालय संस्कृत विभागहं महतीं सहायतामासादयम् । एतदर्थमहमनयोर्द्वयोरपि विद्वज्जनयोरत्यधिकं कृतज्ञोऽस्मि । पुस्तकस्यास्य सम्पादनकार्यं भारतसर्वकारस्य (संस्कृतयूनिट) केन्द्रियशिक्षामन्त्रालयाऽऽदेशाच्छ्रीगंङ्गानाथझाशोधसंस्थानप्रयागस्य तत्त्वावधाने सम्पेदे । अत एव पुस्तकस्यास्य प्रकाशनाय डा० आर.के. शर्मणो संस्कृतविशेषाधिकारिणः शिक्षामन्त्रालयभारतसर्वकारस्य क्रियमाणप्रेरणाया एवायं परिणामोऽस्ति यद्धि पुस्तकमिदं मुद्रणमाप्य जनसमाजस्य समक्षमभ्युपागन्तुं पारयामास ।

पुस्तकस्यास्याक्षरसंशोधनमुद्रणयोग्यहस्तलिखितप्रतिसाधनच्छन्दःसूचीनिर्माणादिषु डॉ० जयशङ्करत्रिपाठिनः श्रीशिवशङ्करत्रिपाठिनः श्रीरामपालत्रिपाठिनः श्रीबालकृष्णशुक्लात् श्रीतारिणीशझामहोदयात्तथा संस्कृत सुप्रसिद्धाल्लेखकाद्राजस्थाननिवासिनः श्रीगणेशरामशर्मणश्च साहाय्यं प्राप्तम् । ते एते सर्वे स्वात्मनोऽभिन्नाङ्गभूता वर्तन्ते । अत एभ्यो वर्धापनादय उपचाराः परत्वद्योतका भविष्यन्ति ।

पुस्तकमिदं मुद्रणमाप्य जनसमाजस्य पुरत इतः पूर्वमेवायास्यत । परमेतावत्या लभ्या भूमिकाया लेखन एवैकं सम्पूर्णं वर्षं व्यतीयाय, यदा यदाऽहं भूमिकालेखने प्रयासं कुर्वाणोऽभूवं तदा तदाऽस्वस्थो बोभूयमानोऽतिष्ठम् । अनेन मन्मनसि ग्रन्थं, ग्रन्थकारं प्रति च नानाविधाः कुतर्का उत्पद्यमाना अभवन् । एतत् सर्वं किमर्थं बोभूयमानमासीदिति भगवाञ्छंङ्कर एव जानीते । काशीपतिर्विश्वनाथो विजयताम् !

वसन्तपञ्चमी १९७० प्रभातशास्त्री

गीतगिरीशम्

अनुक्रमः

भूमिका		१—३६
प्रथमः सर्गः	वसन्तविलासः	१
द्वितीयः सर्गः	मानिनीमनोरथः	९
तृतीयः सर्गः	उत्कण्ठितशितिकण्ठः	१३
चतुर्थः सर्गः	गौरीगुरुततराऽनुरागः	१६
पञ्चमः सर्गः	वयस्या रहस्योक्तिः	१९
षष्ठः सर्गः	दुर्गादिशानिर्देशः	२७
सप्तमः सर्गः	प्रतियुवतिरतिवर्णनः	२९
अष्टमः सर्गः	शम्भूपालम्भः	३५
नवमः सर्गः	पार्वतीप्रवर्तनः	३७
दशमः सर्गः	सरसगिरीशः	३९
एकादशः सर्गः	शङ्करदर्शनः	४३
द्वादशः सर्गः	सुप्रीतपार्वतीपतिः	४९
श्लोकानामनुक्रमणिका		५५
गीतसूची		६१
प्रयुक्तानां छन्दसां सूची लक्षणञ्च		६३
गीतगिरीशे समागतरागाणां लक्षणम्		६५

श्रीभवानीशङ्कराभ्यान्नमः ॥

अथ गीतगिरीशं प्रारभ्यते ॥

●

कर्षन्ताविवरेतरस्य मनसी बद्ध्वेव विद्ध्वेव ते,
सम्मोहन्ददतावथांऽशु[1]सुधयाऽऽसिच्येव हर्षं प्रदौ।
किञ्चित्सङ्कुचितौ पुनर्विकसितौ श्वेतौ शिती लोहितौ,
पातामीश्वरयोस्तरङ्गतरलौ लोकान् कटाक्षावुभौ ॥ १

हर्षं श्रीहर्षनामा रचयति वचनैरद्भुतार्थैर्दुरूहै-
र्गम्भीरैर्भावितो भारविरपि तनुते चित्तपद्मप्रबोधम्।
वाग्गुम्फैः सप्रसादै[2]र्मृदुगदितपदैः कालिदासः प्रसीद-
त्युच्चैर्लोकेषु तेषामहमपि चरणाऽम्भोजभृङ्गोऽस्मि रामः ॥ २

हर्यक्षं कपिरनुवर्तते यथाऽयम्,
खद्योतो रविमपि निर्द्धनो[3]यथाऽऽढ्यम्।
औत्सुक्यादहमधुना तथाऽनुकुर्वे,
लालित्यं कविजयदेवभारतीनाम् ॥ ३

कर्पूरपूरगौरीगौरीपतिगीतिसन्ततौ चेतः।
मम निर्मलयतु वाणी ह्रीणा वीणाऽपि यद्गिरो रणति ॥ ४

---

१. अश्रु ख० । २. सप्रमोदैः क० । ३. धनाढ्यम् ख० ।

ललितरागेण गीयते

गजवरवदनविभूषित ! मदरूषित ! ए !
मधुकरगायकगीत ! सुखय गणाऽधिपते ! १
चन्दनमृगमदचर्चित ! कुसुमार्चित ! ए !
सिन्दूरारुणभाल ! सुखय गणाऽधिपते ! २
मुखमोदक ! धृतमोदक ! मतिशोधक ! ए !
विघ्नवनाऽनलरूप ! सुखय गणाऽधिपते ! ३
एकदन्त ! रिपुखण्डन ! कृतमण्डन ! ए !
पुष्करपुष्करमाल ! सुखय गणाऽधिपते ! ४
भृत[1]कङ्कणमणिनूपुर ! सुखगोपुर ! ए !
अघपर्वतशतवज्र ! सुखय गणाऽधिपते ! ५
शिखिवाहनलघुसोदर ! लम्बोदर ! ए !
गौरीनन्दन ! देव ! सुखय गणाऽधिपते ! ६
मूषकवाहनमण्डित ! रणपण्डित ! ए !
खण्डितदानवमान ! सुखय गणाऽधिपते ! ७
रामकवीज्यपदाम्बुज ! साऽङ्गदभुज ! ए !
कविकुलकाव्यनिदान ! सुखय गणाऽधिपते ! ८

●

आस्यैः पञ्चभिराचुचुम्ब दशभिर्दोर्भिः[2]परिस्पृष्टवान्,
नेत्रैरैक्षत पञ्चभिर्दशभिरप्येकां भवानीं भवः ।
वक्षस्तस्य तदक्षमं गिरिसुताहाराऽनुबिम्बैस्तदा,
कायव्यूहमिव स्फुटं विरचयद् भूयात्सुभव्याय वः ॥ ५

---

१. नृत् ख० । २. परिष्वक्तवान् ख० ।

मालवगौडीरागेण गीयते

वहसि शिरसि [१]सुभगे सकलं जनभारम्,
[२]श्रमजलवरहितमस्वेदमपारम् ।
शङ्करधृतधरणीरूप ! विरचय शर्म जने ।। १ ध्रुवपदम्

क्षपयसि निजनिवहे विहरज्जनपापम्,
दिनकरदहनावेहितमपि तापम् ।
शङ्करधृतसलिलशरीर ! विरचय शर्म जने ।। २

प्रसरसि भुवनतले कृततिमिरविनाशम्,
अत्सि च [३]हुतमपि हेतिविलासम् ।
शङ्करधृतहुतवहरूप ! विरचय शर्म जने ।। ३

चरसि जगति विततेबहिरन्तरपावन !
पवनविजितखगपतिपरिधावन !
शङ्करधृतमारुतरूप ! विरचय शर्म जने ।। ४

त्वयि विचरति सत्वरतरचारम् ।
शङ्करधृतगगनशरीर ! विरचय शर्म जने ।। ५

मुञ्चसि निजसमये सलिलं लसदोघम्,
सङ्ग्रहमपि रचयसि च न मोघम् ।
शङ्करधृतदिनकररूप ! विरचय शर्म जने ।। ६

---

१. सुभगो क० । २. अत्र 'श्रमजललव' पाठो मयाऽनुमीयते ख० पुस्तकेऽपि श्रमजलव इति पाठोऽस्ति । ३. द्रुत क० ।

निखिलौषधिनिकरे चिरममृतमुदारम्,
वर्षसि निशि रुचिरं शुचिसारम् ।
शङ्करधृतहिमकररूप ! विरचय शर्म जने ।। ७

वेदवादिविदिते रुचिरुचिता यागे,
तव कल्पितविविधाऽमरभागे ।
शङ्करधृतयज्ञशरीर ! विरचय शर्म जने ।। ८

[1]श्रीकविरामकृते मधुमधुरे गीते,
मुदमुद्वह सदयश्रुतिनीते ।
शङ्करविधृताऽष्टशरीर! विरचय शर्म जने ।। ९

●

लोकान् धारयते मलान् क्षपयते पाकाऽऽदिकं कुर्वते,
तिर्यक् सञ्चरते विभुत्वमजते[2]तापक्षयं तन्वते ।
विश्वं स्वीयकराऽमृतै रचयते साऽऽह्लादमेवन्मखम्,
द्राग् विस्तारयतेऽष्टविग्रहभृते तुभ्यन्नमः शम्भवे ।। ६

निबध्नन् मुञ्चंश्च प्रतिघटिकपर्दन्निजमिमम्,
द्युनद्याः स्पर्शः किं कितव ! पुरतो मेऽपलपसि ।
इति व्याहृत्येशं प्रति गतवतीं दारुविपिनम्,
सरोषां श्रीगौरीं सविनयमथोवाच विजया ।। ७

विषधरगरलाऽनलाऽऽकुलानाम्,
मलयवनीघनचन्दनाऽनिलानाम् ।
तव वपुरसहं शिरीषकल्पम्,
शिवमवलोकय तल्लसद्वसन्ते ।। ८

---

१. कविरामतते ख० । २. तभ्याः क० ।

वसन्तरागेण गीयते

सरसरसालकुसुममञ्जरिकामधुपिञ्जरितदिगन्ते,
स्मरसृणिकिंशुकलग्नविरहिजनकालखण्डनिभवृन्ते । १
विहरति पुररिपुरिह मधुमासे ।
रमयति सुररमणीरधिकं प्रतितरुकृतकुसुमविकासे ॥ ध्रुवपदम्
सरसिजपत्रनिहितमदनाऽक्षरनिकरोपमितमिलिन्दे ।
कुण्ठितयुवतीहठकलकण्ठरवाऽहितहितयुववृन्दे ॥ २
विहरति० ।
कुसुमशरस्मिततुल्यमल्लिका सक्षणदक्षिणवाते ।
विपिनसमृद्धितिलकतिलकद्रुमसूनजनितजनशाते ॥ ३
विहरति० ।
अल्पितहिमकल्पितजनशर्मणि सरसीलसदरविन्दे ।
लोकितरजनिविशोकितकोकविलोकितपरमाऽऽनन्दे ॥ ४
विहरति० ।
विरहिक्रकचायितकेतकमुखकृतबहुरजोनिधाने ।
अरुणाऽशोककुसुममयमदनज्वलदनलाऽस्त्रविताने ॥ ५
विहरति० ।
फुल्लतमालनिवहतिमिरापहकृतकुरुबकसुमदीपे ।
केसरबकुलगन्धबन्धुरे ह्रीनतविकुसुमनीपे ॥ ६
विहरति० ।
ललनागलवलयितभुजमुन्मदमदनभ्रमितभुजङ्गे ।
दुस्सहविरहदहनविनिपातितपृथुतरपथिकपतङ्गे ॥ ७
विहरति० ।

श्रीकविरामकथितमधुमाधवसमयसदृशवनरूपम् ।
शमयतु कलिशमलं[१] सुरपरिवृढवरदरतेरनुरूपम् ॥ ८
विहरति० ।

●

मन्दाऽऽन्दोलितमालतीव्रततयो माकन्दवृन्दाऽन्तर-
भ्रान्तिभ्रष्टजवाः सुपर्वतटिनीपूरप्लवाऽम्बुप्लुताः ।
कान्दर्पीमपकीर्तिमेव विरहिव्यापादनेनाऽर्ज्जिताम्,
भृङ्गालीं भ्रमयन्त ईरितमदा वान्त्यद्भुता मारुताः ॥ ९

उद्धूता वनमरुता मलीमसाऽलिश्रेणी-
युवककनकनिभा परागपङ्क्तिः । १०

पान्थानान्दहति मनांसि चन्दनाऽद्रे-
रायाता भुजगगराऽग्निजेव कीला[२] ॥ ११

विविधैर्विबुधवधूनामस्तोकैः कामविव्वोकैः ।
विस्मितमुपदर्श्येशं गिरमूचे सहचरी गिरिजाम् ॥ १२

●

गुर्जरीरागेण गीयते

ऊरुद्वयजितरम्भा रम्भा कृतशङ्करपरिरम्भा ।
प्रीणयतीशमनङ्गनिदेशं हृदि दधती गतदम्भा ॥ १
हर इह विबुधवधूविसरे कलावति विहरति चतुरतरे ॥ ध्रुवम्

इह विधुवपुषि वसति सुरमादकममृतन्तदिति वदन्ती ।
चुम्बति शम्भोरलिकन्धन्या सहजन्या विहसन्ती ॥ २
ह र इह० ।

---

१. पुर क० । २. युग्मकमिदम् ख० ।

पटुतरपाटविकटपठितिस्फुटताण्डवपण्डितमेषा ।
मदयति मृदुमृदुलास्यरसेन हरं हरिणी वरवेषा ।। ३
हर इह० ।

साचीकृत्य मुखन्तु घृताची पुलकाऽचिततनुभागा ।
मिश्रयतीशकटाक्षितमात्मकटाक्षशतेन सरागा ।। ४
हर इह० ।

सुरथा नखपदतातिरतिधवले वपुषि भवस्य सुजाता ।
स्फटिकपट्टिकातलकलिताक्षरमदनकीर्तिरिव भाता ।। ५
हर इह० ।

मेनकयाऽपि कयाऽपि विलोकनभङ्ग्या भगवति भर्गे ।
रतिरुदपादि मुदाऽऽकुलया वरयाऽमररमणीवर्गे ।। ६
हर इह० ।

विहरन्तीषु रतिप्रतिबिम्बतनूषु वृषध्वजचित्तम् ।
मुञ्चति सुरसरितन्न कृपण इव कृच्छ्रोपनतं वित्तम् ।। ७
हर इह० ।

त्रिनयनकेलिकलाकलगीतं श्रवणपथं प्रतिनीतम् ।
श्रीकविरामसुखात्समुदीतं पातु जनं भवभीतम् ।। ८
हर इह० ।

●

दृप्यद्दर्पककेलिकोमलकलावज्ञातवात्स्यायनः,
स्वर्वेश्याशतचक्रवालमिलितः कर्पूरपूरद्युतिः ।
स्वर्धुन्युत्तररोधसि स्मरसुधादुग्धोदधिः पार्वति !
क्रीडत्यत्र स कोऽपि पर्वततटीपाटीरवाटीविटः ।। १३

जायास्तां जयकारिणोऽद्य कुमुदाऽम्भोजप्रमोदप्रदे,
ते नेत्रे नितरां चराऽचरगुरोर्गौरीपतेः पावने ।
याभ्यामर्द्धविबोधितैः सकुमुदैरम्भोजनुर्भिः सदाऽ-
पर्णाचेतसि लुप्यते न रजनीघस्रद्वये संशयः ।। १४

इति श्रीगीतगिरीशे[१] वसन्तविलासो
नाम प्रथमः सर्गः ।। १ ।।

१. महाकाव्ये इत्यधिकं पदम् ख० ।

द्वितीयः सर्गः

परावृत्त्या प्रमुञ्चन्ती मानिनी मानगौरवम् ।
गौरी सहचरीमूचे चिन्तयन्ती त्रिलोचनम् ।। १

रामगिरिरागेण गीयते

कंवलकररयविरणितवीणाकर्णनसंज्ञितकर्णम् ।
ग्रामसमुच्छलदच्छतानततिविश्रुतिसन्मुखवर्णम् ।। १

मानसमसमशरज्वरदूनं स्मरति वरं वरदं मम नूनम् ।। ध्रुवपदम्

शुचिरससरसीलघुनौकानिभचन्द्रकलाऽलिकभागम् ।
हिमकरदिनकरतदितरलोचनजनजनिताऽधिकरागम् ।। २

मानस० ।

मेचकतामृगमदमदहररसभूपतिमिव घननीलम् ।
गरललवं गलमिलितन्दधतं स्वमिवोपकरणशीलम् ।। ३

मानस० ।

गङ्गातुङ्गतरङ्गनिरर्गलगर्वहरणकचभारम् ।
अभयदभुजभजनैकपरायणजनजनिधोरणिहारम् ।। ४

मानस० ।

स्मितयुतजितरतिसुरयुवतीशततरुणिमसफलनरूपम् ।
एवमपि भ्रकुटीविकटायितविजितमदनमृदुभूपम् ।। ५

मानस० ।

शुकपिकलघुकरमधुमधुरध्वनिरध्वनि यस्य जिह्रीते[१] ।
स्थितमलकोपवने पवनेन सुशीतलतामभिनीते ॥ ६
मानस० ।

संततविततवासनारसवशचित्तगतं जनमेनम् ।
वीक्ष्य समक्षमिव क्षणहृष्यदनिद्रनिजेन्द्रियमेनम् ॥ ७
मानस० ।

श्रीकविरामभणितवृषभध्वजरूपमघौघविनाशम् ।
ध्यायत[२]जितमरुतो यतयः ! परिशातितसंसृतिपाशम् ॥ ८
मानस० ।

●

आकृष्टन्न निवर्तते प्रयतते यातुं स्मृतेर्मुद्रणे,
भूयः संस्मरति प्रमज्जति पुनस्तत्रैव नैवेङ्गते[३] ।
धृष्टं मानसमित्थमालिमिलितं गङ्गाधराऽङ्घ्रिद्वये,
संरोधोत्थभयादिवर्च्छति न मे पार्श्वं करोम्यत्र किम् ॥ २

देवीनामरविन्दसुन्दरदृशां लीलाविलासान्रसा-
दास्वाद्य स्वदृशा समुत्सुकमना मेनात्मभूरप्यभूत् ।
याचे[४] च स्वसखीं सुराधिपवधूगर्वाऽपवर्गक्षम-
स्मेरश्रीवदना समागमय मां रुद्रेण भद्रेऽधुना । ३

●

१. ओहाङ् (गतौ) धातोः रूपम् । २. घ्रसयति ख० । ३. इगि धातोर्लटि रूपम् । ४. ऊचे ख० ।

गौडीरागेण गीयते

त्रिनयननयनपथं गतया मम लोचनरोचनरत्नम् ।
हरकरकृष्टभुजाऽग्रयुजा कृततल्पसमर्प्पणयत्नम् ।। १

विजये ! ... कालदलनमधीशम् ।
स्मरपरवशमनसा तरसा सखि ! रमय मया सममीशम् ।। ध्रुवपदम्

ह्रीभरनमितमुखाम्बुजया चिबुकोर्ध्वकरणकरभागम् ।
पुलककुलाऽङ्कुरभूषितया पृथुवेपथुदर्शितरागम् ।। २
स्मर० ।

स्वेदविभेददराऽर्द्रितया स्वरसूचितसात्त्विकभावम् ।
दिशि दिशि देशितलोचनया निजनयनविजितमृगशावम् ।। ३
स्मर० ।

धूनितधन्यततूलतयाऽऽश्रितनिधुवनविविधविधानम् ।
तूलीतलमधिरोपितया हृतवसनजघनपिधानम् ।। ४
स्मर० ।

मृदुलननध्वनि[१]भङ्गिभृताऽऽहितदन्ततितिक्षतिभीतिम् ।
करलुलिताऽलकमण्डलया परिचुम्ब्य कृताऽधरपीतिम् ।। ५
स्मर० ।

नखमुखलिखितपयोधरया परिरम्भरभसरसमग्नम् ।
मणितभणितिपटुपण्डितया किलकिञ्चितचरितकृतज्ञम् ।। ६
स्मर० ।

---

१. भृङ्गि, ख० ।

अविरतरतरसमज्जितया प्रथमार्पितभावनिमीलम् ।
विगतेतरतनुचेष्टितया कुचकलशावलम्बनशीलम् ।। ७
स्मर० ।

श्रीकविरामकथितमिदमवितथमन्धकरिपुरतिरम्यम् ।
उत्सुकगिरिसुतया भणितं भण धन्यतरश्रुतिगम्यम् ।। ८
स्मर० ।

●

लास्यन्नाकनतभ्रुवां सफलयन्हास्यं वितन्वन्स्मरम्,
दास्यं स्वस्य च कारयन् प्रमुदितं स्वाऽऽस्यञ्च सन्दर्शयन्,
सद्यः सङ्कुचितेङ्गितः प्रियसखि! प्रायः समुद्वीक्ष्य माम्,
यद् वैलक्ष्यमगान्मृडो मम मनो नूनन्न तन्मुञ्चति । ४

प्रसूनैरनूनैरशोको न शोकं, विरागं परागैर्न मल्ली मतल्ली ।
न भाभिः शुभाभिर्विभावर्यधीशो, समाधिन्ममाऽऽधिञ्च दूरीकरोति ।। ५

मद्भालेन्दुकरैः कुचाऽम्बुजयुगं किन्ते कठोरायते,
शम्भोरित्थमुमां प्रति प्रवदतो वाणीमुपाकर्ण्य सा,
गङ्गाभीतवदायतन्निजकरं कृत्वा कपर्द्दाच्छनै—
र्मुग्धेन्दुं प्यधिताऽथ तत्र विहसन् श्रीशङ्करः पातु वः ।। ६

इति श्रीगीतगिरीशे मानिनीमनोरथो
नाम द्वितीयः सर्गः ।। २ ।।

●

तृतीयः सर्गः

विहरति शितिकण्ठे कण्ठलग्नैकगङ्गा,
भुजयुजि भवभार्याऽन्यात्परावृत्य कोपात् ।
पशुपतिरपि यान्तीन्तामनाकार्य सद्यो—
नुशयवशमयासीद् दृप्तकन्दर्पतप्तः ॥ १

कर्णाटरागेण गीयते

जर्ज्जरीकृतनिर्ज्जरीजनमानयाऽगतमेव ।
वीक्ष्य मां वनिताशतावृतमेतया सरुषेव ॥ १

शिवशिवट्टशाऽरुणितया सा बभावितरेव ॥ ध्रुवपदम्

तर्कयामि तदाननेऽरुणता भृता मधुरेण ।
रोषपोषजरक्तिमा न विभिद्यते ह्यधरेण ॥ २
शिवशिव० ।

सामिवक्रितवक्त्रया यदपाङ्गभङ्गिरसज्जि[१] ।
एतया मयि तद्विचिन्तयतो ममाऽन्तररञ्जि[२] ॥ ३
शिवशिव० ।

किं गताऽसि हताश ! कामकृशानुहेतिहतेन ।
काकुवाक्यशतन्मया श्रृणु भण्यते प्रणतेन ॥ ४
शिवशिव० ।

---

१. षञ्ज् (सङ्गे) धातोः (भावे) रूपम् । २. रञ्ज् (रागे) इत्यस्य (भावे) रूपम् ।

रम्यसेऽप्यनुगम्यसेऽपि च नम्यसेऽपि भवानि !।
एहि देहि च दर्शनं कुरु चाटुकानि नवानि ॥ ५
शिवशिव० ।

क्वाऽसि साहसिके ! विहासकशीलतामपहाय ।
जीवयोरसि हेमकुम्भनिभौ कुचौ विनिधाय ॥ ६
शिवशिव० ।

मन्तुमर्हसि मन्तुमेतमुमे ! न मे न कदाऽपि ।
एवमाचरिताऽस्मि मानिनि ! दास एष सदाऽपि ॥ ७
शिवशिव० ।

रामजित्कविवर्णितं कलिकल्मषं विनिहन्ति ।
गीतमेतदधीतमाशु लसद्यशोऽपि तनोति ॥ ८
शिवशिव० ।

●

पाशौ ते श्रवणावपाङ्गतरला दृग्भङ्गयस्ते शराः,
कोदण्डं भृकुटीयुगं गिरिसुते! नासाऽपि ते नालिका ।
सीमन्तस्तव भल्ल एष च भवद्धम्मिल्लकोऽप्युल्लसन्,
खड्गश्चण्ड्यसि तत्प्रसूनविशिखाऽनेकाऽऽयुधान्येकिका ॥ २

सुधा त्वदधरासवस्तव मुखं जगन्नन्दनम्,
विमानमपि ते मनस्त्वमसि कल्पवल्ली स्वयम् ।
उरोजनवचूचुके तव च दिव्यचिन्तामणी,
ततस्त्वदपरां दिवन्न गणयामि रम्भोर्वहम् ॥ ३

मणीमाला ज्वाला स्रगपि हृदि हालाहलसमा,
मृणालीयं बाला विषधरकराला लगति मे ।
अराला तद्वेणी मदनकरवालाऽऽकृतिरुमाम्,
चिरं चित्ते धर्त्तुर्व्यथयति ममाऽऽत्मानमसकृत् ॥ ४

उमानासानाली तदुपहितमुक्ता च गुलिका,
वियोगोष्णश्वासोऽप्यनलमिलनं यो मृगमदः ।
स एवार्कं भस्माऽयसनलकविस्फोटनकरम्,
मनोहंसं हंसि ! स्मर मम कथं न द्रुततरम् ॥ ५

तान्दृष्टि वदनन्तदेव कबरीन्तामेव तौ च स्तनौ,
तावेवात्र भुजौ पदे अपि च ते तस्यास्तदेवोदरम् ।
पश्यामि भ्रमभङ्गिभिर्नयनयोरत्यल्पभाग्यः परम्,
ता वाचोऽमृतशीतला मृदुतरं स्पर्शं च नैक्षे क्वचित् ॥ ६

गौरीदृशस्तव कथं भविता न यानम्,
किं देव ! दिव्यसि सरित्यतिवेलमेहि ।
निह्नुत्य जह्नुतनयां जययोक्त इत्थम्,
श्लिष्टं स वोऽवतु जले विहरन् गिरीशः ॥ ७

इति श्रीगीतगिरीशे उत्कण्ठितशितिकण्ठो
नाम तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः

अथ कथमपि सन्निवृत्त्य सद्यस्तव विरहव्यथाऽर्दितस्वचित्ता ।
क्षणमपि युगवन्नयत्यपर्णेत्यवददिमं विजया समेत्य शम्भुम् ॥ १

धन्यासीरागेण गीयते

परभृतरुतमतिनिशितशूकशतमिव मनुते श्रुतिनीतम् ।
मधुकररवमवगत्य विगायति वीणागतमपि गीतम्[1] ॥ १
शैलसुताऽहितखेदा[2] ।
शङ्करविरहदहनकदनादतिपाण्डुरवर्णविभेदा ॥ ध्रुवपदम्
नलिनीदलमतिशीतलममलन्तदुरसि राजति मुक्तम् ।
हुतभुजि हुतमिव मलिनिममर्म रवताऽऽकुञ्चनयुक्तम् ॥ २
शैलसुता० ।
कलयति शशधरकरसङ्करमनलमिलनमिव गौरी ।
चन्दनमपि तापयसि च तामति शरदि द्युतिरिव सौरी ॥ ३
शैलसुता० ।
वहति च कुसुमशयनगतगिरिजा वपुरतिविरहविलासम् ।
अर्ज्जुनशितशरतल्पतलस्थितदेवव्रतकृतहासम् ॥ ४
शैलसुता० ।
इच्छति चन्द्ररसेन लिखितुमखिलामपि तव भव! मूर्तिम् ।
विगलज्जल[3]भरविलुलितनयना तनुते न लिखितपूर्तिम् ॥ ५
शैलसुता० ।

---

१. गीतम् ख० । २. स्वेदा क० । ३. जर क० ।

श्वसिति न विश्वसिति क्षणमञ्चति तापमुतापरिमेयम् ।
प्रभवति तच्छ्वसितेन[1] मुकुर इव शशिनि कलङ्ककलेयम् ।। ६
शैलसुता० ।

प्रणमति चित्तगतं बहिरिव सा वदति च गिरमनुवारम् ।
वरद ! भवन्तमृते मम जीवनभेषजमितरदसारम् ।। ७
शैलसुता० ।

श्रीकविरामगवीनवनीतजरसरुचिरस्ति यदा ते ।
हरविरहाकुलहैमवतीसुवचोऽस्तु मनस्यवदाते ।। ८
शैलसुता० ।

●

निर्यान्ती भवनाद् विशन्त्यपि पुनस्तत्रैव भूयस्तदे-
वाभ्यस्यन्त्यथ मंक्षु दिक्षु चकितं चक्षुः क्षिपन्ती सती ।
मानेनैकत एकतश्च मदनेनाऽऽकृष्यमाणा द्वयो-
र्नो मुञ्चत्यनुरोधमन्धकरिपो ! [2]सा सङ्कटे वर्तते ।। २

याति स्विद्यति खिद्यति प्रलपति प्रत्येति रोमाञ्चति,
ध्यायत्यप्यथ मूर्च्छति प्रपतति भ्राम्यत्यलन्ताम्यति ।
उच्चैर्निःश्वसिति प्रमीलति पुनः सङ्कम्पते सीत्करो-
त्येवं शर्व! वियोगिनी न लभते का कामवस्थां शिवा ।। ३

हरविरहिणीन्दुःखाकर्त्तुं विधोः किरणैरुमाम्,
हरति न चिराद् वृक्षव्राताद् दलानि बलान्मधुः ।
न स परमिदं चित्ते धत्ते यतः क्वचिदुद्गतम्,
किशलयमपिच्छायायै स्यात् भृशं कृशवर्ष्मणः ।। ४

१. तद्वसितेन क० । २. मा ख० ।

पुटिः[१] कल्पत्यल्पाभरणमपि भारत्यनलति,
प्रसन्नःशुभ्रांशुर्गरति[२] घनसारद्रवलवः ।
प्रसूनस्रक् सर्पत्यथ पिकरुतं कुन्तति मृदु,
श्रुतौ तस्याः शम्भो ! शमय विरहाग्निन्नगभुवः ॥ ५

विटपि विटपानारुज्याऽयं नयन् गगनाङ्गणे,
शिखरि शिखरप्रायं रेणुन्दिशासु समर्पयन् ।
मम विशकृशं गात्रं वाताः शिवं प्रति संवह–
त्विति गिरिसुता तिष्ठत्यद्य प्रवातवनान्तरे ॥ ६

यदत्रच्छत्रं हृन्निहितशतपत्रं विरचितम् ,
सरोनालीदण्डं विशततिमयश्चामरमपि ।
विधत्ते युक्तन्तद् वितनुरुरसि श्रीगिरिभुवः,
स्रवन्नेत्राम्भोभिर्विरहमभिषिच्याऽद्य नृपतिम् ॥ ७

संग्रामे गजदितिजेन सार्द्धमीश–
स्तत्कुम्भौ कुचसदृशौ निरीक्ष्य गौर्य्याः ।
संस्विद्यन्नथ पृथुवेपथुश्च गच्छन्,
तत्सैन्यान् क्षणमिव हर्षयन् पुनातु ॥ ८

इति श्रीगीतगिरीशे[३] गौरीगुरुतराऽनुरागो नाम चतुर्थः सर्गः ॥ ४ ॥

---

१. त्रुटिः ख० २. गिरति ख० । ३. महाकाव्ये इत्यधिकं पदं ख० ।

पञ्चमः सर्गः

दारुकान्तारसत्कुञ्जे मञ्जुगुञ्जन् मधुव्रते ।
निलीयाऽवस्थितां देवीं देवदूती व्यजिज्ञपत् ॥ १

केदाररागेण गीयते

शिशिरतरं विधुकिरणकलापम् ।
मनुते दहनमिवाऽहिततापम् ॥ १
शैलजे ! पुरजित्तव विरहे[1] ॥ ध्रुवपदम्

कुसुमशयनगतनवनवमल्लीम् ।
चेतसि चिन्तयति स्मरभल्लीम् ॥ २
शैलजे० ।

मृदुलमरालसुकूजितजातम् ।
नूपुररव इव हरहृदि भातम् ॥ ३
शैलजे० ।

वीक्ष्य सुचन्द्रकबर्हणापिच्छम् ।
स्मरति स कबरं सकुसुममच्छम् ॥ ४
शैलजे० ।

अलकनन्दिकासंकतजातम् ।
तव पदमञ्चति सप्रणिपातम् ॥ ५
शैलजे० ।

---

१. नवविरहम् ख० ।

पर्यटति प्रतितरुगुरुखेदम् ।
ध्यायति वपुरपि मनसि तवेदम् ॥ ६
शैलजे० ।

जपति च तव शुभमभिधावर्णम् ।
चलति[१] दलेऽपि दिशति निजकर्णम् ॥ ७
शैलजे० ।

श्रीकविरामरचितपदमाला ।
दिशतु सुखं [२]परिहृतभवजाला ॥ ८
शैलजे० ।

●

मणिहारः फणिहारः गलगरमगरुद्रवोऽपि विरहे ते ।
भालानलमलिकाऽमृतरुचिरतिशेते शिवे! भृशं शम्भोः । २

भवानीशेह त्वत्पदनलिनसंवाहनकरी,
कयाचित्सुन्दर्या भगवति भवे प्रार्थित इति ।
कुतः सेति क्वेति क्व च मम तथा भाग्यमितिस,
ब्रुवन् दृष्टिन्दत्ते दिशि दिशि निराशोऽथ भवति ॥ ३

श्रुत्वाऽपि रुचिरा वाचो निर्बन्धमनुबन्धतीम् ।
पुनरुक्तवती गौरीं गिरीशप्रेषिता जया ॥ ४

●

असाउरीरागेण गीयते

कलय कलस्वरमधुरिमनिर्ज्जितपिकनिकरे सखि ! मानम् ।
नवयौवनलावण्यविलासकलाविफलत्वनिदानम् ॥ १

---

१. वलति ख० । २. परिहृत क० ।

अनुरज गिरिजे! गिरिशे परमे! अहमपि ते प्रकृतौ ननु न रमे। ध्रुवपदम्

सम्प्रति तं स्वपतिं प्रति रोषकषायविदूषितचित्ता।
नगनन्दिनि ! निन्दति[१] मम सुवचनमिदमविविक्तनिमित्ता ॥ २
अनुरज०।

अनुनय मेनमुमे ! मम मानय मा नय मनसि विखेदम्।
पुररिपुवपुषा तव वपुरेतदुशन्ति[२] बुधा गतभेदम् ॥ ३
अनुरज०।

गिरमपि मे न शृणोषि वृणोषि दृशापि न मामभिजाते !।
जनमिममपि शिवमिव कलयसि किं वृत्तिरियन्मयि का ते ॥ ४
अनुरज०।

परिचर हरमनुसर मम मतमिति परिहर गर्वमखर्वम्।
अनुशयमेषि पुरा परिभावय पुरहृत्प्रियमिह सर्वम् ॥ ५
अनुरज०।

स्रोत इवति गतन्न वयः पुनरूनितमृदुकिरणाऽऽस्ये !।
भज भवमङ्गवनानि कौमुदीमदहर[३] मोहनहास्ये ! ॥ ६
अनुरज०।

यदि तु विपक्षवधूपरिजनवचनैरयमधिकमुदास्ते।
कथय तर्हि किमुपायशतैरपि तव सखि! सुमुखि! मुदास्ते ॥ ७
अनुरज०।

इति कविरामजितः कृतिरतिरसिकेषु तनोतु विनोदम्।
हरचरणस्मरणाऽमृतमज्जनजनितमपि च हृदि मोदम् ॥ ८
अनुरज०।

---

१. नन्दसि ख०। २. वश् (कान्तौ) धातोः रूपम्। (कान्तिरिच्छा)
३. मुदहर ख०।

यद्वाचोऽमृतमञ्जुलाः श्रवसि ते शूलन्ति यत्ते तनुः,
शुष्यत्युद्भ्रमति त्वदीयदृगपि श्वासावली जृम्भते ।
अश्रु प्रस्रवति ज्वलज्ज्वलनवत्तल्पं भवत्यङ्ग ! तत्,
सर्वं तेऽस्य दुराग्रहस्य गिरजे! मानस्य विस्फूर्जितम् ॥ ५

त्वन्मोहेन विवर्द्धते सममयं वासन्तिको वासरो,
ह्रासं रात्रिरुपैति मानिनि ! मुदा साकं नवैवाम्बिके! ।
प्रालेयं स्रवति त्वदश्रुसरिता सार्द्धं मरुद्दक्षिण-
स्त्वच्छ्वासेन सहाऽश्नुते जगदिदं मा मानमेनं भज ॥ ६

●

मालवगौडीरागेण गीयते

नन्दापुलिने मृगमदमलिने [1]सुररमणीरमयन्तम् ।
पश्य[2] विभावैरीरितभावैं रतिपतिमपि नमयन्तम् ॥ १
अलकोपवने शीतलपवने विहरति सति स कपर्दी ।
अरिकरिकुम्भविबुधवनिताजनपीनस्तनपरिमर्दी ॥ ध्रुवपदम्
कति नु न कथितं मम मतिमथितं गिरजेऽनुसर गिरीशम् ।
स्मरशरविद्धं प्रणयनिबद्धं प्रवदसि च स्वमनीशम् ॥ २
अरिकरि० ।
धवलं वसनं कृतविधुहसनं सितनिशि सखि ! परिधेयम् ।
किङ्किणिकाऽऽस्ये नवरवलास्ये मृगमदरज इह देयम् ॥ ३
अरिकरि० ।

---

१. **पुर** ख० । २. **पश्यति** ख० ।

सति रतिकाले लास्यसि बाले ! स्फटिकगिरावि व शम्पा ।
पुरहरहृदये रतिरणविदये पुरुषायितधृतकम्पा ॥ ४
अरिकरि० ।

रजनीशेषं विगतनिमेषन्नयति कथञ्चिदधीरम् ।
मां नय तां प्रति मारुत ! सम्प्रति कथयति चेति समीरम् ॥ ५
अरिकरि० ।

यान्ति च दूरन्मुनयोऽतूरुं पश्य जपासुमभासम्[१] ।
लघु चलहृदयं प्रकुरु च सदयं मा तनु पर परिहासम् ॥ ६
अरिकरि० ।

विगतविलम्बन्दधदवलम्बं स्तनघटमपि रतिपूरे ।
अद्भुतरचनं सुचिरमवचनं गिरिशो मज्जतु दूरे ॥ ७
अरिकरि० ।

श्रीकविरामे हरपदकामे भणति परमभणनीयम् ।
धनजनजातं शङ्कितपातन्न सुखं हृदि गणनीयम् ॥ ८
अरिकरि० ।

❁

कुञ्जे कुञ्जे सरसि सरसि ग्रावणि ग्रावणि त्वा-
मन्विष्याऽसौ स्वपिति विपिने खिन्नखिन्नः श्लथाङ्गः ।
स्वप्नेऽपि त्वां कथमपि चिरात्प्राप्य तत्राऽसहिष्णो-
र्दैवाज्जातैर्झटिति गिरिजे ! बोध्यते[२] स प्रलापैः ॥ ७

१. लासम् ख० । २. बाध्यते ख० ।

वहति दहनं[1] गोधौ[2] ज्ञात्वा तव स्तनकुङ्कुमम्,
स्पृशति फणिनं श्यामं वामे[3]! करैः कवरीभ्रमात् ।
तव हृदयगां कस्तूरीं वा विचिन्त्य चिरं गले,
स्थिरयति गरं मुग्धे ! मुग्धो हरो हरिणीक्षणे!॥ ८

दहतु दहतु नूनन्तत्तनूं चन्दनं द्राक्,
तुदतु तुदतु चेतस्तस्य बाला मृणाली ।
विधुमलयसमीरौ तां[4] कथन्तस्य मूर्तिम्,
व्यथयत इति चित्रं चित्तमत्राश्नुते[5] मे ॥ ९

मन्दरे कन्दरं सुन्दरे[6] मन्दिरं,
कल्पिताऽनल्पपुष्पाणि तल्पोत्तमम् ।
दीप उद्दीपितश्चन्द्र उन्निद्रदृक्,
पङ्कजे भोगसामस्त्यमस्त्यत्र तत् ॥ १०

स्मृत्याऽङ्कुरितो दृष्ट्या, द्विपत्रितः पुष्पितो वचसा ।
हरकामकल्पशाखी फलितः, परिरम्भणेन ते भूयात् ॥ ११

आशाभिर्गिरिशस्य मानिनि ! समं यात्यस्तशैलं विधु-
र्नैष्ठुर्येण सहैव ते समुदितः प्राच्यामगुः शोणिमा ।
कम्पन्द्राक् कुमुदेव सार्द्धमपि मे यात्यद्य हृत्कैरवम्,
तत् कालो न विलम्बितुन्द्रुततरं श्रीशङ्करं प्रीणय ॥ १२

---

१. गहनम् क० २. ललाटे इत्यर्थः । ३. कामे क० । ४. तं क० ।
५. अश् (संघाते) धातोः रूपम् । ६. सुन्दरम् ख० ।

सामेरं रागेण गीयते

क्षिपति स शयनन्दिशि दिशि नयन्नयति भवान्यविरामम् ।
श्वसितन्तनुते नर्म न मनुते ननु ते स्मरति निकामम् ॥ १
शशधरदीपे ज्वलति समीपे शिशिरशिलातलतल्पे ।
[१]वसति भवो भवतीविरहादतितापकरेऽनलकल्पे ॥ ध्रुवपदम्

सितकरभासं चुम्बति साऽऽशं गौरतया तव तुल्याम् ।
प्रविशति गेहं भगवति ! सेहं याति च विहरणकुल्याम् ॥ २
शशधर० ।

वहति च कोऽहं क्षणमिति मोहं वियदालिङ्गति बाले !
भ्रममयभवतीशतसताऽद्भुतभूमिमकाले ॥ ३
शशधर० ।

गमयति समयं स तथा हृदयं सदयं भवति ममाऽपि ।
गिरिजे मतिमति ! न विना भवतीमितरा हरहृदि काऽपि ॥ ४
शशधर० ।

बहु हा ! रावं ज्ञपयति भावं जड इव भवति ! कदाचित् ।
सुरनरदानवनवललना न शिवं सखि ! सुखयति काचित् ॥ ५
शशधर० ।

वीणाक्वणने वेणो रणने कलकण्ठीकलनादे ।
स्वरमिव[२] तव स विभाव्य विलासिनि! निपतितुमिच्छति पादे ॥ ६
शशधर० ।

कृपय कृपावति ! नतिनुतिभिर्मम मृड्य मृडन्तदवस्थम् ।
प्रत्ययमयसे न वचसि यदि मे पृच्छ मनः स्वमुरस्थम् ॥ ७
शशधर० ।

---

१. वसति तवैव भवो विरहात् ख० । २. स्मर इव क० ।

श्रीकविरामे कलिजयकाव्ये गणयति गुणगणमैशम् ।
मौहन्तिमिरन्नश्यतु सुचिरं चन्द्रोदय इव नैशम् ।। ८
शशधर० ।

●

तमःपुञ्जे कुञ्जे सुरभि[1]सुमशटयाऽऽद्रिततनु-
र्बहिर्ज्योत्स्नाज्वालाकवलिततरः शैलशिखरे ।
स्रवद्वार्भिः शीतै[2]र्हिमगुमणिभिर्भिन्नहृदयो,
न कुञ्जे नारण्ये न गिरिशिखरे शान्तिमयते ।। १३

वनात्कुञ्जं कुञ्जाद् गिरिमपि गिरेर्देवसरितम्,
सरित्पार्श्वात् निम्नं भजति तत उच्चैः स्थलमपि ।
विमुह्यत्युत्ताम्यत्यथ पतति रोदित्यपि शिवः,
पुनर्धैर्यन्धत्ते पुनरपि विधत्ते स शयनम् ।। १४

किं स्त्रीयन्ते शिरसि मम किं स्त्रीयमेषाऽस्ति मौलौ,
भूतिश्चास्या भव शुभतरा भूतिरेवाऽत्र भव्या ।
पृष्टो गौर्या गिरमिति[3] मुदे व्याहरन् वक्रवक्राम्,
गङ्गां निन्दन् रहसि विहसन् पातु वश्चन्द्रचूडः ।। १५

इति श्रीगीतगिरीशे[4] वयस्यारहस्योक्ति-
र्नाम पञ्चमः सर्गः ।। ५ ।।

●

१. सुरति ख० । २. हिमगुमणिभिः चन्द्रकान्तमणिभिः इति भावः ।
३. अति ख० । ४. महाकाव्ये, इत्यधिकं पदम् ख० ।

षष्ठः सर्गः

उत्थायोत्थाय[1] तत्रैव पतन्ती गतिनिःसहा ।
उमाऽऽख्यत् स्वदशां सख्या दक्षा दक्षाऽध्वरद्रुहि ॥ १

असाउरीरागेण गीयते

कलयति रुचिरुचिरं सकलङ्कम् ।
विरहिचितामिव चन्द्रसशङ्कम् ॥ १
भूतपते! भूतपते! खिद्यति गिरिजा दारुवने ।। ध्रुवपदम्
मलयपवनधुतकमलमधूली ।
गिरिजा हृदि पितृवनगतधूली ॥ २
भूतपते० ।
चलति च विश्लथतरपदचारा ।
वितनुग्रहकृतविविधविकारा ॥ ३
भूतपते० ।
मदनदवथुधूमलितमृणालम् ।
तुदति[2] श्यामलभुजग इवाऽलम् ॥ ४
भूतपते० ।
स्मरमृगयोरधिमिलदिव जालम् ।
मनुते शैवलमगदुहिताऽलम् ॥ ५
भूतपते० ।
स्वदृशा दिशि दिशि मधुकरचित्रम् ।
चित्रयतीव शिवा सुविचित्रम् ॥ ६
भूतपते० ।

---

१. उच्छायोच्छाय क० । २. नुदति ख० ।

व्यथयति कर्वुरिकेव कराला ।
रजनिरुमामुद्वुकीकसमाला ॥ ७
भूतपते० ।

श्रीकविरामरचितमिति गीतम् ।
कुसुमाऽञ्जलिरिव हरमुपनीतम् ॥ ८
भूतपते० ।

●

पलाशं चापं ज्या विशमपि शरः कुन्दकलिका,
मधूलीधूली यन्निजकरदृढीकारचतुरा ।
ततो भित्त्वा भित्त्वा सुरनरमनांस्यद्य मदनो,
विधत्ते वेद्धन्तां भृशकृशतनुं भर्ग ! खुरलीम् ॥ २

शङ्के शङ्कर ! शीतदीधितिकलाः काकोलकीलामयी–
रेताःपञ्चदशाम्बरेऽमृतमयीन्त्वद्भालगामेकिकाम् ।
यज्ज्योत्स्नागरघूर्णितेव गिरिजा सद्यःपरान्निर्वृतिम्,
प्रत्यङ्गस्मरणे तवाऽलिकशशाङ्कांशं विचिन्त्याऽश्नुते ॥ ३

प्रणयकलहकाले याति वामे ! प्रकुप्ये–
तरदिशि गिरिजाङ्घ्रावर्द्धनारीश्वरोऽयम् ।
कृतककनकवृक्षे दक्षिणो दक्षिणं स्वम्,
पदमनुवलयन् वः शङ्करः शङ्करोतु ॥ ४

इति श्रीगीतगिरीशे दुर्गादशानिर्देशो
नाम षष्ठः सर्गः ॥ ६ ॥

●

सप्तमः सर्गः

अथ शुभसमयेऽस्मिन् चन्द्रिकाक्षीरपूरम्,
विकचकुमुदबालान् पाययन्ती दिगैन्द्री ।
हिमकरकुचमेकं व्याचकारोत्सुका सा,
स कविगुरुसमीपेऽप्यङ्ककस्तूरिकाक्तम् ॥ १

उदयन्तं विधुं वीक्ष्य वयस्यां गिरिजाऽब्रवीत् ।
तमः पातुस्तमः स्वच्छोदरेऽस्याङ्क इवेक्ष्यते ॥ २

नूतना पूतनेवेयन्दिगैन्द्री सखि ! भाति मे ।
यद् घूर्णयति बालां मां क्षरन्तीन्दुस्तनाद् विषम् ॥ ३

दीर्घस्य श्वसितस्य मे पुर इमं कृत्वा करे दर्पणम्,
सम्पूर्णं प्रतिविम्बिताऽमृतकरं तिष्ठाऽऽलि ! तावत्क्षणम् ।
वाष्पैः प्राक् मलिनीकरोम्यमुमहं येन द्रुतं श्यामली-
भूतो राहुरिवाऽधमो विधुरयं भूयोऽपि नाऽऽलोक्यते ॥ ४

स्मर संज्वरखिन्नया मया या, हरमाकारयितुं जया न्ययोजि ।
मम सा स च दुर्विदग्धदैवान्न दृशोर्गोचर इत्यवोचदम्बा ॥ ५

विराडीरागेण गीयते

मत्तमधुकेसरिप्रखरनखकिंशुकम् ।
भीषयति विरहिणी हृदयमतिहिंसुकम् ॥ १
कामये कमिह वरदं विना मदनमदमर्दिता ॥ ध्रुवपदम्

द्रुततरं गतवती मम वचनहारिणी ।
सा समयलङ्घिनी[१] किमिति सहचारिणी ॥ २
कामये० ।

विकटकण्टकविपिनपद्धतावद्य ते ।
किं स्वयं तदनुगमनाय नोत्पद्यते ॥ ३
कामये० ।

ईशितरि लङ्घयति समयमहमालये ।
स्तनजघनभरमधिकभारमिव चालये ॥ ४
कामये० ।

यत्र मम मानसी वृत्तिरधिकाऽऽश्रिता ।
तन्मनसि कामिनी काऽपि सुभगाऽऽस्थिता ॥ ५
कामये० ।

अहह ! पुरदारणः प्रणयिनीदेवता ।
साऽपि तुष्यति न मे स्मरणनतिसेविता ॥ ६
कामये० ।

शशकिरणवह्निमपि मृतिकृते यापितम् ।
स्फुटति हृदयन्न मम मदनबाणतापितम् ॥ ७
कामये० ।

रसिकजनसुखदकविरामवचनस्रजा ।
भवतु भवसेविनाम्मनसि शमलोन्मृजा ॥ ८
कामये० ।

---

१. लङ्घनम् ख० ।

वैतानाऽग्निरसौ वियोगदहनो वेदी ममोरः पिको,
होता यज्ववरो मधुः स शमिता कामः समित् केसरम् ।
उद्गाता मधुपोऽत्र चन्दनरसः सर्पिःशिवप्रीतिकृद्-
मत्प्राणैः पशुभिर्भविष्यति महायज्ञोऽश्रुनद्यास्तटे ।। ६

फुल्लाऽशोकपलाशपुष्पनिकरोऽग्निश्चन्द्रिकाऽऽज्याहुति-
प्रोद्भूतो मलयानिलेन सुहृदा फूत्कृत्य संवर्द्धितः ।
तत्कुन्तायितकेतकैर्मुहुरसौ निःकृष्य चण्डाऽनले,
चण्डालस्मरकालखण्डमधुना निर्भज्य निर्भुज्यताम् ।। ७

किं गोत्रस्खलिते तया सुभगया बद्धो निरुध्य प्रियः,
किं वा काऽपि चकार विघ्नममरीभ्राम्यद्भुजङ्गीभ्रुवा ।
औदासीन्यमथाऽपि वा मयि गतः किंचिन्मदागःस्मरन्,
यत्कैलाशविलाससानुलवलीवल्लीतलेऽप्येति न ।। ८

सखीन्नतमुखीं वीक्ष्य विनेशं समुपागतम् ।
रमितं गङ्गयाऽऽशङ्क्य शिवं दृष्ट्वेव साऽब्रवीत् ।। ९

●

कल्याणरागेण गीयते

कुसुमशरज्वरहरमुखचन्द्रा ।
अधरसुधोपनयनहृततन्द्रा ।। १

सा हि सुरसरिदन्धकरिपुणा ।
विहरति रहसि रतिनिपुणा ।। ध्रुवपदम्

भ्रूयुगरतिरणसमुचितचापा ।
शङ्करकरसरसिजहृततापा[१] ।। २
सा हि० ।

नयनतरङ्गितशरशतधारा ।
खरनखरायुधविहितविकारा ।। ३
सा हि० ।

यौवनकरिकुम्भितकुचताला ।
कवरीविजितमदनकरवाला ।। ४
सा हि० ।

प्रकटविकटपुलकाङ्कुरकूर्मा ।
विकचकेलिजलरुहधृतचर्मा ।। ५
सा हि० ।

परिरम्भन[२]पीडितहरहृदया ।
दन्तदंशकचकर्षणविदया ।। ६
सा हि० ।

स्मरसमरान्तजजलकणजाला ।
अलकलुलिततिलकाऽऽकुलभाला ।। ७
सा हि० ।

श्रीकविरामभणितरतिचरितम् ।
वर्द्धयते हरपदरुचिसरितम् ।। ८
सा हि० ।

●

१. कुङ्कुमरसकृतहस्तावापा क० । २. परिरम्भण इति युक्तः पाठः ।

हरमुखप्रतिमोऽपि हलाहलप्रतिभटः समुदेत्य मुदे मम ।
विधुरतृप्त[1]तरो विधुरव्यधैःप्रथयतेऽथ यतेरपि विक्रियाम् ॥ १०

मल्लाररागेण गीयते

सुरसरिदलिके परिललदलके भ्रूयुगकृतभासने ।
तनुते सरलन्तिलकमविरलं शरमिव सुशरासने ॥ १
कुरुते केलीरमरवने प्रणयी पुरारिरनिशम् ॥ ध्रुवपदम्

सकुसुमविसरे कुन्तलनिकरे सभगणरजनीसमे ।
हीरकमुचितं रचयति सशितं ग्रहमिव रचनाक्षमे ॥ २

द्युतिकर[2]कलिते तदुरसि ललिते कुचरथपदभासिते ।
मृगमदरचितं समकरमुचितञ्जनयति सुमवासिते ॥ ३
कुरुते० ।

मेचकवसने घनचयहसने कटितटरुचिपोषणे ।
तडिता तुलितं रशनमलुलितन्नह्यति[3] मतिपोषणे ॥ ४
कुरुते० ।

अङ्गुलिसुदले करमृदुकमले कण्टकिभुजदण्डके ।
सुममधुसदृशं भूषणमकृशं वलयति जननन्दके ॥ ५
कुरुते० ।

चरणसरसिजे जनितमनसिजेऽरुणतररुचिरञ्जिते ।
हंसकयुगलम्मुञ्चति विमलं सुशयनतलसञ्जिते ॥ ६
कुरुते० ।

---

१. नृत्य क० । २. द्युतिभर ख० । ३. णह् (बन्धने) धातोः ।

सुखयति सरितम्मृदुरतिचरितं हठिशठशितिकण्ठके[१] ।
प्रतितरुचरणम्मम किमशरणं वन इह यदकुण्ठके[२] ॥ ७
कुरुते० ।
हरपरिचरणे धृतनिजकरणे कविपरिवृढरामके ।
प्रवदति सकलं विगलतु शमलं क्षितिजगदभिरामके ॥ ८
कुरुते० ।

●

अनुकलमनुरागन्तस्य दूति ! ब्रवीष्य-
प्रकटकपटमस्य त्वन्न जानासि नूनम् ।
बहिरिह करिणो यान् दर्शयन्ति स्वदन्तान्,[३]
भवति खलु ततोऽन्या चर्वणार्थं रदाली ॥ ११

पापं वः प्रदहन्तु शङ्करशरा व्योम्न्युच्छलन्तः पुर-
प्लुष्टौ स्पष्टपराक्रमा सवृतिके ब्रह्माण्डभाण्डोदरे ।
यैर्विद्धे विवराऽध्वनान्तरगतं ज्योतिस्तृतीया वृते,
अद्याऽपि प्रतिदृश्यते निशि निशि भ्राजिष्णुतारामिषात् ॥ १२

इति श्रीगीतगिरीशे[४] प्रतियुवतिरतिवर्णनो
नाम सप्तमः सर्गः ॥ ७ ॥

●

---

१. शतकण्टके क० । २. पदकुन्तके क० । ३. बहिरिह करिणां ये दर्शनार्थाय दन्ताः, ख० । ४. महाकाव्ये, इत्यधिकं पदम् ख० ।

अष्टमः सर्गः

स्खलन्तं क्षीववत् प्रातर्निद्रामुद्रितलोचनम् ।
नुदन्तन्नतिभिर्मन्तुम्मृडं कुप्यमुमाऽब्रवीत् ।। १

भैरवरागेण गीयते

जागर गरिमजनितनिद्रावलविगलदवाचकवर्णा ।
प्रलपति रसना किमपि तवोत्तररचनवचस्यधमर्णा ।। १

मैहि शङ्कर ! मैहि पुरहर ! सा तव जीवितमेका ।
मा विरचय वचनं कुहकाधिप! हा! तव निकृतिरनेका ।। ध्रुवपदम्

मलिनिमपूरविपूरितमन्तस्तव कितवाऽस्ति नृशंसम् ।
तत्प्रकटयति बहिर्गलनैल्यनिभेन शितिन्निजमंशम् ।। २
मैहि शङ्कर० ।

अलकाकुलमतिलकमनलं कृतिमिलितकुसुमलवभालम् ।
मम न तवाननमातनुते मुदमरुणनयन! रुचिजालम् ।। ३
मैहि शङ्कर० ।

कङ्कणकटकहारहरिचन्दनकुचकुङ्कुमकृतचिह्नम् ।
वपुरपि धृतमदभेदभिदन्तव भव! कथमद्य विभिन्नम् ।। ४
मैहि शङ्कर० ।

शशधरशकलसदृशनखपदतिरुरसि लसति तव जाता ।
त्वदलिकशशिपरिपूरणिका किमुमां व्यथयतुमुपयाता ।। ५
मैहि शङ्कर० ।

रमणीचरणालक्तकरक्तमिदन्तव हृदयकपाटम् ।
गल्लगकज्जलविन्दुरपि च मम तनुते चित्तविपाटम् ।। ६
मैहि शङ्कर० ।

इन्दुनदीजलमृदुलनिजाङ्गकसदृशन्न तव चरित्रम् ।
विषविषधरसम्पर्कसमर्पितमिदमतिपरमपवित्रम् ॥ ७
महि शङ्कर० ।

श्रीकविरामविगुम्फितखण्डितगिरिजावचनमखण्डम् ।
खण्डयतीदमकाण्डकृतान्तनितान्तपतत्पृथुदण्डम् ॥ ८
महि शङ्कर० ।

●

गल्लं गल्लगकज्जलञ्च हृदयं हृत्स्थं प्रियाकुङ्कुमम्,
नेत्रे नेत्रगतारुणत्वमपि ते सद्यः समुद्वीक्ष्य मे ।
दृक् फुल्लत्यपि सङ्कुचत्यपि मनोरज्यत्यपि द्वेष्ट्यपि,
भ्रस्यत्यश्रु सुशीतमुष्णमपि तन्मूढाऽस्मि कुर्वे नु किम् ॥ २

वन्ध्ये वेधसि सत्रपेऽत्र सुरपे किङ्कार्यमित्युच्यते,
चित्ते चिन्तयति भ्रमत्यपि यमे चन्द्रे च तन्द्राकुले ।
वैमुख्यं शिखिनि व्रजत्यथ रवौ वैवर्ण्यमप्यागते,
शम्भुः सस्मितमेव पीतगरलः पायादपायात्स वः ॥ ३

इति श्रीगीतगिरीशे[1] शम्भूपालम्भो
नाम अष्टमः सर्गः ॥ ८ ॥

●

१. महाकाव्ये इत्यधिकं पदम् ख० ।

नवमः सर्गः

कामे कोपे च सदृशमनुरोधन्निबन्धतीम् ।
दोलालोल[1]तरस्वान्ताञ्जयोचे पर्वतात्मजाम् ॥ १

धन्यासीरागेण गीयते

कृपयति पुररिपुरतिविधुवदने ।
ज्वलसि मुधालि ! विरहबहुदहने ॥ १
शङ्करे मा भज भामिनि! मानमुमे !। ध्रुवपदम्
अगणितमणिगणगुम्फितहारम् ।
कलय विगलवति वरदे ! भारम्[2] ॥ २
शङ्करे० ।
किं विलपसि विलपिष्यति वहलम् ।
मद्वचनं यत्कुरुषे विफलम् ॥ ३
शङ्करे० ।
शशिमुखि! कुसुमरचितशुचिशयने ।
परिचर हरमिह पङ्कजनयने ! ॥ ४
शङ्करे० ।
हरमुखमृदुदीधिति[3]रुचिजालम् ।
पायय नयनचकोरकवालम् ॥ ५
शङ्करे० ।
तिष्ठति मनसि न गीरविकारा ।
तव विपरीतकलश इव धारा ॥ ६
शङ्करे० ।

---

१. दोल क० । २. तारम् ख० । ३. दीधेति ख० ।

क्व निधिरुपैति जनं सखि ! विधनम् ।
स क्व वदति न न नेति च वचनम् ॥ ७
शङ्करे० ।
श्रीकविरामगदितवरवचसा ।
तुष्यतु गौरीपतिरतितरसा ॥ ८
शङ्करे० ।

●

यत्कर्णं पिदधास्यमुष्य गिरिजे नाम्नि श्रुते तद्दिशाऽऽ-
कृष्टा दुष्टकिशोरिकेव चरणौ पश्चात् क्षिपस्यद्य यत् ।
उक्तैहीति न नेति जल्पसि गिरं यत् त्वन्मम[1]नाश्रवे,
तन्माना[2]न हि चण्डि! चण्ड्यसि परं स्पष्टं पुनः कर्मणा ॥ २

उत्कीर्य स्वदृशन्नखेन सहसा सम्पूरयत्यच्युते,
साहस्रं सकृदूनमम्बुजवलिं शम्भोः सपर्यार्थकम् ।
आश्चर्यं यदभूदुमामनसि तद्भूयोऽपि संवर्द्धयन्,
सद्यः श्रीशदृगर्पणात् दिशतु वः श्रीशङ्करः सम्पदम् ॥ ३

इति श्रीगीतगिरीशे पार्वतीप्रवर्त्तनो
नाम नवमः सर्गः ॥ ९ ॥

●

१. वचने न स्थिते ! —इत्यर्थः । २. अर्थदृष्ट्या तन्नाम्ना इति समीचीनः पाठः ।

दशमः सर्गः

मदनानन्दसन्दोहनिमज्जन्मानसः शिवः ।
शिवावक्षोजकलश श्रयिष्यन्नाह तां प्रियाम् ।। १

रामगिरिरागेण गीयते

मम मनोऽसि प्रिये! चक्षुरसि तनुरसि प्राणपञ्चकमसि च सत्यम् ।
वदनमुन्नाम्य पीयूषरसवर्षिणा लोचनेन स्नपय भृत्यम्[1] ।। १

शिवे ! रुचिरचरिते![2] रचय[3] मयि वचनमविकारम् ।
मौनमपमुह्य रदचन्द्रिकाभिर्ममातन्वतनुसागरमपारम् ।। ध्रुवपदम्

कज्जलश्यामलितमश्रुविस्रुतमिदं वहति सुमुखीदृगमुपमानम् ।
आगलन्निशि तमिस्रन्निपीयाऽऽशु किं चन्द्र उद्गिरति तदमानम् ।। २
शिवे ! रुचिर० !

विश्वसिषि मद्वचसि चेन्न दिव्येन ते भावये मम मनसि शुद्धिम् ।
अधरकोशं[4] धयाम्यतनुतप्तस्तनन्धारयामि स्थिरय बुद्धिम् ।। ३
शिवे ! रुचिर० !

कोपलोपक्षमन्तन्वि ! तव नापरन्नतिमृते मम मनसि जाने ।
मदलकालिकुलमपि तव चरणसरसिजे शीलतु सौभगनिधाने !।। ४
शिवे ! रुचिर० !

स्तनशिखरिविकटतटसङ्कटे निःक्षिपावैषि यदि मामिह समन्तुम् ।
चिकुरकर्षणयुतं कुरु लताऽऽवेष्टितकमुरसि रुद्धन्न दिशं गन्तुम् ।। ५
शिवे ! रुचिर० !

---

१. नृत्यम् ख० । २. रुचिरतिचरिते ख० । ३. रच ख० । ४. कोकम् क० ।

मत्तमदनद्विपप्रकटपटहारवं घटय मणिनूपुरध्वानम् ।
कुसुमशरघातसंघातजित्वरतरन्देयमपि नखरपददानम् ॥ ६
शिवे ! रुचिर० !

भृकुटीभुजगीयुगप्रचितमधराऽमृतेनाऽपहर नलिनमुखि ! मोहम् ।
कमलकोमलपदद्वितयपरिचारणाऽनुचर एवाऽस्मि तव सोऽहम् ॥ ७
शिवे ! रुचिर० !

कविनृपतिरामजिद्वदनचन्द्रच्युता भूविबुधसुखकरसुबेयम् ।
हरतु हरसेवकश्रुतियुगलचुलुकिता भवदहनबलमपरिमेयम् ॥ ८
शिवे ! रुचिर० !

●

त्वन्मौनं खलवाचमृच्छतु मनस्तापो विपक्षस्त्रियम्,
लज्जा ते ह्रियमेव गच्छतु भयं ते भीतिमेवैतु च ।
पीडा यातु च ते प्रसूनशयनं प्रत्येव सम्प्रत्ययम्,
दासोऽल्पासमुपागतः सुमुखि ! ते स्निग्धो विदग्धः प्रिये ॥ २

पद्मैर्यत्र इवान्तरे मधुकरा निष्पिष्य निश्च्योतिताः,
तेषामेष[1] रसस्तमिस्रमधुना मन्ये जगन्त्यश्नुते ।
तत्सम्प्रत्यपि किं श्रुतिद्वयमिदम् मुग्धे ! पिधत्से मुधा,
मुक्त्वैवाऽङ्गुलिबन्धमाधिभिदुरा मद्गीः सुधा पीयताम् ॥ ३

श्यामा त्वं वयसा ब्रवीषि मनसा श्यामश्च मां सुन्दरि!,
श्यामा रात्रिरियन्निकुञ्जभवने श्यामन्तमः सर्वतः ।
श्यामन्तीरमिदन्तृणैर्द्युसरितः श्यामास्तमालैर्दिशः,
श्यामः कोऽपि रसः करोति मयि तत् शार्दूलविक्रीडितम् ॥ ४

---

१. एक ख० ।

वदननयनकरचरणं पद्मान्यधरस्तवैव[1] बन्धूकम् ।
गात्रं चम्पककुसुमान्येतैरस्त्रैर्ज्जगजयत्यतनुः ॥ ५

अतिस्तोकाऽऽलोका कलितचरिते ! तेऽलकलता,
मुखेऽलं खेलन्ती चिबुकतलमुल्लङ्घ्य लसति ।
तमस्तोमन्तस्यां गलबिलमभिव्याप्य पिबता,
किमुद्गीर्णा ग्लावा तिमिररसधारा नु वलिता ॥ ६

चकोराः श्रीचोरास्तवनयनयोर्विश्वविदिता,
दिवा दिव्यं शुद्ध्यै विदधति मृषाऽङ्गारकवलैः ।
अदाहे हेतुत्वं भजति पुनरेषान्निशि निशि,
त्वदीयाऽऽस्यस्पर्द्धाधरविधुवितीर्णाऽमृतभुजिः ॥ ७

शिवो[2] वक्षोजस्ते चिकुरनिकरः कृष्ण[3] उत ते,
विधुर्वाणी जिष्णुर्गतिरपि च ते हंसकरिणाम् ।
बृहद्भानुर्मूर्तिर्निधिरपि कलानान्तव मुखम्,
स्तवो यस्माच्छ्रीदः वत तदसि सर्वाऽमरमयी ॥ ८

चक्षुस्तुष्यति हृष्यति प्रियसखि ! स्वान्तं श्रुतिः सज्जते,
स्पन्दत्येष पयोधरस्त्वगपि ते रोमाञ्चमभ्यश्नुते ।
इत्थन्दृग्विषयं गते मयि वहन्त्यङ्गानि सर्वाणि ते,
सम्यक् प्रीतिविजृम्भितं कथमियम् मूका न गीर्लज्जते ॥ ९

---

१. एष ख० । २. खपुस्तके तु शिवे इत्यस्ति । ३. कृत्स्न क० ।

धम्मिलच्युतमल्लिकं श्रमजलव्यालुप्तकस्तूरिका-
पत्रं सत्रपलोचनाऽञ्चलमतिश्वासावलिव्याकुलम् ।
वक्त्रं वीक्ष्य रतान्ततान्तमुदयन् मोदो भवान्या भवः,
प्राक्[1] संरब्धतरः स्मरः स्मृतिमताञ्चित्ते चिरन्तिष्ठतु ॥ १०

इति श्रीगीतगिरीशे[2] सरसगिरीशो
नाम दशमः सर्गः ॥ १० ॥

●

१. स्रक् क० । २. महाकाव्ये इत्यधिकं पदम् ख० ।

एकादशः सर्गः

अनुनीय पुरारातौ गतेऽनुशयतापिताम् ।
बालां मालामिव म्लानान्तां सखी गिरमैरयत् ॥ १

मारुणीरागेण गीयते

चरणशरणमुपगतमन्धकरिपुमपखेदं कुरु दुर्गे !।
अकपटचाटुवचनरचनाभृति मा कुटिला भव भर्गे ॥ १
दुर्गे ! पुरहरणमभिमतमभिसर केलये ॥ ध्रुवपदम्
अतिभूमि गतमपि नतिरन्तं नयति कृशोदरि ! मानम् ।
न नतिशतैरपि तव सोऽपैति मनस्तव जैह्म्यनिधानम् ॥ २
दुर्गे ! ०।
तव मञ्जीररणितमनुलक्ष्य विपक्षवधूरतिदीना ।
मन्दादरमिह मन्दरगिरिमन्दारवनेऽस्तु निलीना ॥ ३
दुर्गे ! ०।
नुदति सुदति ! पवनोऽपि मनोहरहरसेवक इव पृष्ठे ।
सरसिजमुखि! दक्षिणहरणं[1] क्षणमिममधिमहय महिष्ठे! ॥ ४
दुर्गे ! ०।
त्वामाधेचन्दनवनमियमन्यभृताऽऽह्वयतीव सुलब्धम्[2] ।
क्षणकरणीये कर्मणि तरुणि! प्रकरिष्यसि नु किमब्दम् ॥ ५
दुर्गे ! ०।

---

१. दक्षिणहरिणम् ख० । २. सुदष्टम् क० ।

पृष्ठे नवगतगतिमवलम्ब्य निमीलय शङ्करनेत्रे ।
यौवननृपतिद्वारचरस्तनकृतरोमावलिवेत्रे ॥ ६
दुर्गे ! ० ।

स्वस्त्ययनं मधुकरसामगमुनिरुचितं प्रभवति कर्त्तुम् ।
जयनान्दीमधुना रशनारवमर्हसि लघ्वनुसर्तुम् ॥ ७
दुर्गे ! ० ।

श्रीकविरामभणितमतिसुन्दरगिरिजोद्यमनसुगीतम् ।
ऐक्षवमधुमाकन्दसिताऽमृतरसमधुरत्वमतीतम् ॥ ८
दुर्गे ! ० ।

●

अङ्गं स्रक्ष्यति[1] वक्ष्यति प्रियवचो [2]द्रक्ष्यत्यतृप्यद्दृशा,
भद्रं प्रक्ष्यति शक्ष्यतीह[3] यदि सा मे हर्षमावक्ष्यति ।
इत्यस्वल्पविकल्पनैः पुररिपुः सङ्कल्पनैर्जल्पनै-
र्यामं कल्पितकल्पविभ्रममिमन्नेष्यत्यकल्पः कथम् ॥ २

भालचन्द्रहतध्वान्ते कैलाशगिरिगह्वरे ।
प्रदर्श्य श्रीहरं गौरीं सत्रपां विजयाऽब्रवीत् ॥ ३

●

असाउरीरागेण गीयते

कल्पलतिकाततिप्रचुररुचिरे[4] ।
विलस कैलाशभुवि भवनिकट-
इह कुसुमचितचिकुरनिकरे ॥ ध्रुवपदम्

---

१. सृज् (विसर्गे) धातो रूपमिदम् । २. द्रक्षति—इति मूलपाठः । ३. शक्लृ (शक्तौ) धातो रूपम् । ४. गीतमिदं संगीतशास्त्रदृशा त्रुटितमिव भाति ।

मिलितमल्लीमतल्लीसुशयने ।
कमलदलसदृशनयने ॥ १
विलस० ।
मलयमारुतविहितसुरभिभावे ।
रतिरचितचतुरहावे ॥ २
विलस० ।
मत्तमधुपप्रकरगीतिमुखरे ।
मृगमदकुचपरिसरे ॥ ३
विलस० ।
गौरकरकिरणधवलितविभागे ।
हरचरणयुगसरागे ॥ ४
विलस० ।
मधुरपिकनिकररवरमितकर्णे ।
तनुविजितकनकवर्णे ॥ ५
विलस० ।
गन्धसम्बन्धबन्धुरधरणिके ।
गलतरललितमणिके ॥ ६
विलस० ।
हरचरणपरिचरणविगतपापे ।
शङ्कर ! धृतिवशितकुसुमचापे ॥ ७
रामजिति कविवरे कृपय ।
विलस० ।

●

स्मृत्या तवान्तरमपूरि महेश्वरस्य,
भ्रान्त्या च ते बहिरिदं भृतमेव विश्वम् ।
वक्षस्तदस्य परिपूरय वक्षसा ते,
मूढे ! वसन्ततिलकायितकाननेऽस्मिन् ॥ ४

सा मन्दाक्षेण मन्दाक्षं मन्दाक्षतरं वचः ।
ब्रुवन्ती भीतभीतेव विवेशाऽऽनन्दमन्दिरम् ॥ ५

●

टोडीरागेण गीयते

रागतरङ्गितगुरुगौरीसुखसागरवर्द्धनमिन्दुम् ।
स्वच्छललाटतलप्रतिफलितशिवाऽलिकमृगमदबिन्दुम् ॥ १

हरमिष्टतरं निजमतिसरसि मरालम् ।
ददर्श साऽधरचञ्चुविचुम्बितरदरुचिविशदमृणालम् ॥ ध्रुवपदम्

कुङ्कुमरसरञ्जितहिमबालुकधवलहृदाऽऽहितलोभम् ।
रविकरविच्छुरिताऽन्तरशारदमुदिरमिव स्फुटशोभम् ॥ २
हरमिष्टतरं० ।

मरकतमेचकगललदाऽऽननगौरिमसुरुचिरभासम् ।
नालतलाऽऽगतमधुकरमण्डितपुण्डरीककृतहासम् ॥ ३
हरमिष्टतरं० ।

पञ्चाननधृतपञ्चदशेक्षणदशशयकिशलयवन्तम् ।
गिरिजाऽऽलोकनपरिरम्भणरसमित एव स्फुटयन्तम् ॥ ४
हरमिष्टतरं० ।

भालकलावदरालकलाङ्ककचन्दनविन्दुलसन्तम् ।
दुग्धजलधिमिव शुक्तितलस्थितपृथुमुक्ताफलवन्तम् ॥ ५
हरमिष्टतरं० ।

क्वचिदिच्छाविजनितनिजलोहितनीलवर्णमविकारम् ।
अम्बरमिव तेजस्तिमिरद्वयसङ्गरुचिरमपारम् ॥ ६
हरमिष्टतरं० ।

शितिपीताऽऽदिविविधवसनद्युतिमिश्रिततनुरुचिपूरम् ।
धातुशताऽचितसितपर्वतवरमिव तिष्ठन्तमदूरम् ॥ ७
हरमिष्टतरं० ।

श्रीकविरामभणितमधुरहरमोहनरूपमदभ्रम् ।
कलिकल्मषपटलं विधुनोतु समीर इवाऽऽयतमभ्रम् ॥ ८
हरमिष्टतरं० ।

●

हर्षं हृदो हृदि निविश्य दृशा तदानीम्,
यः क्षोभितः पुरजिता गिरिराजपुत्र्या ।
स्वेदश्च शीततरमश्रु च तत्तरङ्गः,
तच्छैवलं बहिरदृश्यत रोमहर्षः ॥ ६

स्मृतिं स्मारीं सारी पठति निखिलां या खलु मम,
प्रयात्युड्डीयेयं झटिति विघटत्पञ्जरतलात्[१] ।
प्रगृह्णीमः सख्यो ! द्रुततरमुपायात तदिमा-
मिति व्याजान्नीतो झटिति[२] जययाऽऽलीपरिजनः ॥ ७

---

१. पवनविघटात् पञ्जरमुखात् क० । २. झगिति क० ।

मस्तन्यस्तत्रिदशतटिनीविन्दुवृन्दोपमाना-
स्तारा यस्मिन् नटति निपतन्त्युद्धताः स्रग्जटाग्रैः ।
मन्दाऽऽक्रान्ताऽपि च धरणिरुत्कम्पते यत् पदाभ्याम्,
वाताघातात् तरिरिव हरः पातु स प्रीणयन् वः ॥ ८

इति श्रीगीतगिरीशे निःशङ्कशङ्करदर्शनो
नाम एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः

प्रवृत्तव्यावृत्तप्रकटितनिजाऽऽकूतनयनाम्,
पदं किञ्चित्किञ्चित् शयनदिशि यास्यत् विदधतीम् ।
निदेशं काङ्क्षन्तीं चलहरकरक्षान्तचरिताम्,
विविक्ते व्यासक्तां पुररिपुरुवाच प्रियतमाम् ।। १

देशाख्यरागेण गीयते

नखलघुविधुभिरपाकुरु मुखविधुभृत्यजनैरिव लम्बम् ।
वदनाऽमृतकिरणाऽऽवरकालकतिमिरनिचयमविलम्बम् ।। १
परिचर मामासादितपदयुगसरसिजमङ्गने ! ध्रुवपदम्

मानिनि! सकृपमलङ्कुरु चरणनलिनयुगलेन मदङ्कम् ।
तत्परिचरतु चिरेतसुहृदमिव मम करकमलमशङ्कम् ।। २
परिचर० ।

तव पदनलिनमिदं स्वशिरस्सु वहन्ति शयनकुसुमानि ।
जलजनुषि स्फुटयन्तु कुसुमशतराज्यमसममुषमानि ।। ३
परिचर० ।

रतिपतिकेलिशैलकुचयुगले मृगमदपत्रककुङ्कम् ।
मम नखचन्द्रचन्द्रिकाचतुरा तनुतामतिमिरपुञ्जम् ।। ४
परिचर० ।

वितनु च वदनकुमुदमुदयद्दयहृदये ! मम सविकाशम् ।
तव दशनद्युतिकौमुदिकाभिरुदञ्चय वचनविलासम् ॥ ५
परिचर० ।

मम गलरुचियमुना तव मषिसरसुरसरिदिह प्रयागे ।
मयि वितर स्तनकनककलशकौ पिककृतकुहूविभागे ॥ ६
परिचर० ।

चलदलदलजित्वरतरमङ्गमुपायनमुपनय महृयम् ।
मृदुनिधुवनमधुना विदधे मम साहसमिदमिह सहृयम् ॥ ७
परिचर० ।

श्रीकविरामरचितमुचितमिदमन्धकरिपुरतिरम्यम् ।
गायत चित्ररथप्रभृतिभिरपि चतुरतरैरभिनम्यम् ॥ ८
परिचर० ।

●

वक्षःपक्षमभिक्षताऽग्रनखरैर्दन्दस्यमानाऽधरा,
हस्तस्वस्तिकवामनीकृतकुचा मञ्जुक्वणन्मेखला ।
दोर्नद्धालुलिताऽलकाऽऽननननेत्यव्यक्तमुक्ताऽक्षरम्,
जल्पन्ती गिरिजा रराज सुरताऽऽरम्भेति कुम्भस्तनी ॥ २

प्रखरनखराऽऽघातं पातं घनस्तनमण्डले,
चिकुरनिकराकर्षं दन्शं रदैरधरेऽदयम् ।
निजविजयिनो दर्शं दर्शं प्रहृष्यत् हृच्छयः,
स्वयमपि हरः प्रीतं प्रापन्महत्तदिहाऽद्भुततरम् ॥ ३

विलुलितकवरी गलत्प्रसूना,
मृदुकरपल्लवकम्पिनी व्यभात्सा ।
हरतनुमनुवेष्ट्य संस्थिता,
तरुमिव कल्पलता सुपुष्पिताग्रा ॥ ४

इह रतिविपरीतसङ्गरे यज-
जयमगमद् गिरिजा तदत्र योग्यम् ।
समकृतकवरी प्रसूनवर्ष
मणिरशना जयदुन्दुभिप्रणादम् ॥ ५

मनोबन्धन्तस्य व्यतनुत् विबन्धाऽपि कवरी,
विरागो रागश्च व्यदिशदधरः सीधुमधुरः ।
त्रुटन् हारो[1] हार्दं वरदहृदि जग्रन्थ तदिदम्,
प्रिया प्रीत्या प्रातर्निखिलमपि सौख्याय समभूत् ॥ ६

लुप्तः पत्रविशेषकः श्रुतिरपि त्यक्ताऽवतंसाऽथ दृक्-
व्यालोला च्युतचन्दनं स्तनयुगं म्लानाः प्रसूनस्रजः ।
शय्याऽऽशीर्णसुवर्णविन्दुनिचिता सर्वं शिवैनेक्षितम्,
रागन्तस्य नवन्नवञ्च मदनं भूयः समौद्वेलयत् ॥ ७

रताऽन्ततान्तिमत्तनुर्नितान्तकान्तचेष्टिता ।
उवाच वाचमम्बिका निकामकामदं हरम् ॥ ८

१. हारैः क० ।

रामगिरिरागेण गीयते

नयवदने वदनं हृदयङ्गम ! मम मधुराऽधरबन्धुरे ।
शशिसरसीरुहयोरिव सौहृदमघटितमपि घटयान्तरे ।। १
गिरिजाऽऽह गिरमिति शङ्करविहरति निजजनशङ्करे ।। ध्रुवपदम्
जिततिमिरे रुचिरे कवरेऽम्बर इव विरलाऽम्बुदवृन्दके ।
उडुसुषमानि सुमानि समर्पय मधुकरकुलरुचिनिन्दके ।। २
गिरिजा० ।

मृगमदपत्रविशेषकलेखमखेदमुपाऽऽलिख मन्मुखे ।
सरसि सुधासलिले शिव ! शैवलमञ्जरिकामिव सन्मुखे ।। ३
गिरिजा० ।

कुण्डलमण्डलविधुमधुनेह वधान दृढश्रुतिपाशके ।
वदनतुलाधृतिमन्तुमन्तु[1]मपराधसदृशमधिशासके[2] ।। ४
गिरिजा० ।

स्तनगिरिनिर्झरसुन्दरहारसुचारिमधारिणि हृत्तले ।
मम मकरञ्च कराङ्गुलिकोमलदलचलनेन लिखाऽमले ।। ५
गिरिजा० ।

कुरु मम यावकरविकरसङ्करमङ्कतले विनिवेशिते ।
पदकमले विमले युगलेक्षणमणिहंसकयुगसेविते ।। ६
गिरिजा० ।

---

१. अन्तम् क० । २. अनुशासके ख० ।

इदमनुकूलदुकूलवितानकमातनु मदननिकेतने ।
तव सघने जघने मम मणिमयरशने विविधरुचिकेतने ।। ७
गिरिजा० ।

श्रीकविरामरचितवचनाऽमृतसरसि निमज्ज जनायते ।
यदि रुचिरस्ति पुरारिपदाऽम्बुजमधुपटले सुचिराय ते ।। ८
गिरिजा० ।

●

तिलकमलिके मुक्ताहारं गलेऽपि निधेहि मे,
मधुरमधरन्धीराऽऽधायाऽऽनने रमयस्व माम् ।
रचय चरणे मञ्जीरं मञ्ज्वथार्पय मत्कटौ,
पुरटरशनामि[1]त्युक्तः श्रीहरोऽपि तथाऽकरोत् ।। ९

या वाचामुचितार्थसङ्गतिभृतां भङ्गिर्य ओजःप्रसा-
दाद्याः काव्यगुणा यदन्धकरिपुध्यानावधानाऽऽदिकम् ।
भारत्या भरतस्य यञ्च मथितन्तद् रामनाम्नः कवे-
र्विद्वान्सः कलयन्तु गीतगिरिशाच्छ्रीकण्ठपादार्पितात् ।। १०

मधु! विधुतमसि त्वं खण्ड! ते[2] खण्डता स्तात्,
सरक ! नरकमेव त्वं त्वमिक्षो ! क्षुरोऽसि ।
अमृतमनृतमेवाम्र ! म्रियस्वाधर त्वम्,
न हि[3] किमधर इमा यद्रामवाचो जयन्ति ।। ११

---

१. स्वर्णरशनामित्यर्थः, यथा भागवते–अङ्गुष्ठममलं स्फुरत्पुरटमौलिनम् । १।१२।८ । २. खण्डने खण्डना स्तात् क० । ३. मूलहस्तलिखितपुस्तकद्वयेऽपि 'न हि' पाठो वर्तते, येन वृत्तभङ्गो भवति ।

आसीदसीममहिमा [१]स हिमाऽवदात-
मूर्तेर्भवस्य चरणाऽर्चनयाऽऽप्तकीर्तिः ।
श्रीनाथभट्ट इति तत्तनयेन राम-
नाम्नाऽद्भुतं व्यरचि गीतगिरीशमेतत् ॥ १२

इति श्रीगीतगिरीशे[२] सुप्रीतपार्वतीपति-
र्नाम द्वादशः सर्गः ॥ २ ॥

●

१ 'म' क०। २. 'महाकाव्ये' इत्यधिकं पदम् ख०।

श्लोकानामनुक्रमणिका

	पृष्ठसंख्याः
अ	
अङ्गं स्रक्ष्यति	४४
अथ कथमपि	१६
अथ शुभसमये	२६
अनुकलमनुरागन्तस्य	३४
अतिस्तोकाऽऽलोका	४१
अनुनीय पुरारातौ	४३
आ	
आकृष्टन्ननिवर्तते	१०
आशाभिर्गिरिशस्य	२४
आसीदसीममहिमा	५४
आस्यैः	२
इ	
इह रतिविपरीत	५१
उ	
उदयन्तं विधुं	२६
उत्कीर्य	३८
उत्थायोत्थाय	२७
उद्भूता वनमरुत	६
उमानासानाली	१५

	पृष्ठसंख्याः
क	
कर्षन्ताविवरेतरस्य	१
कर्पूरपूरगौरी	१
कामे कोपे	३७
किं स्त्रीयन्ते	२६
किं गोत्रस्खलिते	३१
कुतः सेति	२०
कुञ्जे कुञ्जे	२३
ग	
गल्लं गल्लगकज्जलञ्च	३६
गौरीदृशस्तव	१५
च	
चकोराः	४१
चक्षुस्तुष्यति	४१
ज	
जायास्तां	८
त	
तमः पुञ्जे कुञ्जे	२६
तान्दृष्टिं	१५
तिलकमलिके	५३
त्वन्मोहेन	२२
त्वन्मौनं	४०

	पृष्ठसंख्याः
द	
दहतु दहतु	२४
देवीनामरविन्द	१०
दारुकान्तार	१६
दीर्घस्य श्वसितस्य	२६
दृप्यद्दर्पककेलि	७
ध	
धम्मिलच्युत	४२
न	
निबध्नन्न् मुञ्चंश्च	४
निर्यान्ती भवनाद्	१७
नूतना पूतनेवेयम्	२६
प	
परावृत्या प्रमुञ्चन्ती	६
पाशौ ते श्रवणौ	१४
पुटिः कल्पत्यल्पा	१८
पलाशं चापं ज्या	२८
पापं वः प्रदहन्तु	३४
पद्मैर्यत्र इवान्तरे	४०
प्रणयकलहकाले	२८
प्रवृत्तव्यावृत्त	४६
प्रसूनैरनूनैरशोको	१२

	पृष्ठसंख्याः
प्रखरनखरा	५०
फ	
फुल्लाऽशोक	३१
भ	
भवानीशेह	२०
भालचन्द्रहतध्वान्ते	४४
म	
मन्दाऽऽन्दोलित	६
मद्भालेन्दुकरैः	१२
मणीमाला ज्वाला	१५
मणिहारः फणिहारः	२०
मन्दरे कन्दरं	२४
मदनानन्दसन्दोह	३९
मधु ! विधुतमसि	५३
मस्तन्यस्त	४८
मनोबन्धन्तस्य	५१
य	
यदत्रच्छत्रं	१८
यद्वाचोऽमृत	२२
यत्कर्ण पिदधास्यमुस्य	३८
या वाचामुचिता	५३
याति स्विद्यति	१७

	पृष्ठसंख्याः
र	
रताऽन्तताऽन्तिमत्	५१
ल	
लास्यन्नाकनतभ्रुवां	१२
लुप्तः पत्रविशेषकः	५१
लोकान् धारयते	४
व	
वहति दहनं	२४
वनात्कुञ्जं	२६
वन्ध्ये वेधसि	३६
वदननयनकरचरणां	४१
वक्षः पक्षमभि	५०
विलुलितकवरी	५१
वैतानाऽग्निरसौ	३१
विषधरगरला	४
विविधैर्विबुध	६
विहरति शितिकण्ठे	१३
विटपि विटपानारुज्य	१८
श	
शङ्के शङ्कर	२८
श्यामा त्वं वयसा	४०
शिवो ! वक्षोजस्ते	४१
श्रुत्वाऽपि रुचिरा	२०

स

	पृष्ठसंख्याः
संग्रामे	१८
सखीन्नतमुखीं	३१
सा मन्दाक्षेण	४६
सुधा त्वदधरासवः	१४
स्मृत्याऽङ्कुरितो	२४
स्मर संज्वरखिन्नया	२६
स्खलन्तं क्षीववत्	३५
स्मृत्या तवान्तरमपूरि	४६
स्मृतिं स्मारीं	४७

ह

हरमुखप्रतिमोऽपि	३३
हर विरहिणी	१७
हर्षं श्रीहर्षनामा	१
हर्यक्षं कपिरनुवर्तने	१
हर्षं हृदो हृदि	४७

गीतसूची

	पृष्ठसंख्या:
ऊ	
ऊरुद्वयजितरम्भा	६
क	
कंवलकररय	९
कल्पलतिकातति	४४
कलय कलस्वर	२०
कलयति रुचिरुचिरं	२७
कुसुमशरज्वर	३१
कृपयति पुररिपु	३७
ग	
गजवरवदनविभूषित	
च	
चरणशरण	४३
ज	
जर्ज्जरीकृत	१३
जागर गरिमजनित	३५
न	
नखलघु	४९
नन्दापुलिने	२२
नयवदने वदनं	५२

	पृष्ठसंख्याः
प	
परभृतरुतमति	१६
म	
मतमधुकेसरि	२९
मम मनोऽसि प्रिये	३९
र	
रागतरङ्गित	४६
व	
वहसि शिरसि सुभगे	३
श	
शिशिरतरं	१९
स	
सरसरसाल	५
सुरसरिदलिके	३३
क्ष	
क्षिपति स	२५
त्र	
त्रिनयननयनपथं	११

गीतगिरीशे प्रयुक्तानां छन्दसां सूची लक्षणञ्च

●

अनुष्टुप्—[२]१. [५]१. [६]१. [७]२, ३, ६. [८]१. [९]१. [१०]१. [११]१, ३, ५.

आर्या—[१]४, १२. [५]२, ११. [१०]५.

द्रुतविलम्बितम्—द्रुतविलम्बितमाह नभौ भरौ। [७]१०.

पुष्पिताग्रा—अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा। [१]८. [४]१. [१२]४, ५.

पृथ्वी—जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः। [३]३.

प्रमाणिका—प्रमाणिका जरौ लगौ। [१२]८.

प्रहर्षिणी—म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम्। [१]३, १०. [४]८.

भुजङ्गप्रयातम्—भुजङ्गप्रयातं चतुर्भिर्यकारैः। [२]५.

मन्दाक्रान्ता—मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत्। [५]७, १५. [११]८.

मालभारिणी—विषमे समजा गुरू अनोजे सभरा यश्च तु मालभारिणीयम्। [७]५.

मालिनी—ननमयययुतेयं मालिनी भोगिलोकैः। [३]१. [५]९. [६]४. [७]१, ११. [१२]११.

वसन्ततिलका—उक्ता वसन्ततिलका तभजा जगौ गः। [३]७. [११]४, ६. [१२]१२.

शार्दूलविक्रीडितम्—सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् । [१]१, ५, ६, ९, १२, १३. [२]२, ३, ४, ६. [३]२, ६. [४]२, ३. [५]५, ६, १२. [६]३. [७]४, ६, ७, ८, १२. [८]२, ३. [९]२, ३. [१०]२, ३, ४, ९, १०. [११]२. [१२]२, ७, १०.

शिखरिणी—रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी । [१]७. [३]४, ५. [४]५, ७. [५]३, १३, १४. [६]२. [१०]६, ७, ८. [११]७. [१२]१, ६.

स्रग्धरा—म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् । [१]२.

स्रग्विणी—रैश्चतुर्भिर्युता स्रग्विणी सम्मता । [५]१०.

हरिणी—रसयुगहयैः न्सौ म्रौ स्लौ गो यदा हरिणी तदा । [४]४, ६. [५]८. [१२]३, ९.

गीतगिरीशे समागतरागाणां लक्षणम्

●

प्रथमसर्गे चत्वारो रागा : प्रयुक्तास्सन्ति–ललितः, मालवगौडी, वसन्तः, गुर्जरी च । द्वितीयसर्गे तु द्वौ स्त :—रामगिरिः, गौडी च । तृतीयसर्गे त्वेक एव राग :—कर्णाटः । चतुर्थसर्गेऽप्येकः एव—धन्यासी । पञ्चमे पुनश्चत्वारो रागाः सन्ति–केदार :, असाउरी, मालवगौडी, सामेरी च। षष्ठे त्वेक एवास्ति–असाउरी। सप्तमे त्रयो रागा वर्तन्ते–विराडी, कल्याण :, मल्हारश्च : । अष्टमेऽप्यस्ति चैक-राग :—भैरव : । नवमेऽप्येक एव रागो विद्यते—धन्यासी । दशमेऽपि तथैक-रागोऽस्ति–रामगिरिः । एकादशे त्रयो रागास्सन्ति–मारुणी, आसाउरी, टोडी च । द्वादशे च द्वौ स्त : —देशाखः, रामगिरिः । इत्थमष्टादशरागसंयुक्तमिदं रागकाव्यम् । एषु मालवगौडीरामगिरिधन्यासी–असाउरीरागास्तु कविना बहुश : प्रयुक्ताः, अन्ये तु पुनस्सकृदेव ।

---

१ मालवगौडीराग :

मालवगौडी नाम न कश्चिद् रागो वर्तते, सङ्गीतशास्त्रविदुषां मते मालव-गौडराग एव मालवगौडीरागनाम्ना लोके व्यवहृतो भवति ।

मालवगौडस्य लक्षणम्—

अथमालवगौडेऽस्मिन् गौरीस्वरसमुद्भवे ।
त्यक्तधे रिस्वरोद्ग्राहे नह्यारोहे सुगस्वरः ।
आरोहे यदि गान्धारः पादिर्मान्तो विधीयते ।।

[सङ्गीतपारिजाते]

२ रामगिरिरागः

रामगिरिनामाऽपि कश्चिद्रागः शास्त्रेषु न निरूपितः, अनुमीयते यत् रामक्रीरामकरीरामकलीशब्दानामपभ्रंशोऽयं शब्दः ।

एवमस्य लक्षणं यथा—

षड्जग्रहांशकन्यासा पूर्णा रामकरी मता ।
मूर्च्छना प्रथमा ज्ञेया करुणे सा प्रयुज्यते ॥
रिधत्यक्ताऽथवा प्रोक्ता कैश्चित् पञ्चमवर्जिता ।
त्रिविधा सा समुद्दिष्टा सम्पूर्णा षाडवौडुवा ॥

[दामोदरकृतसङ्गीतदर्पणे]

धवादिनी रिसंवादिन्यथो रिमधकोमला ।
मनिसंवर्जिताऽऽरोहे प्रोक्ता रामकली बुधैः ॥

[रागचन्द्रिकायाम्]

३ धन्यासीराग :

अस्य रागस्यापराणि नामान्यपि सन्ति, यथा—धनाश्री, धन्याशिका, धन्नासी ।

लक्षणञ्चेत्थम्—

रागो धन्यासिसंज्ञोऽयं बहुशो रिधवर्जितः ।
गेयः प्रातरसौ तज्ज्ञैः सन्यासांशग्रहोडवः ॥

[रामामात्यकृतस्वरमेलकलानिधौ]

धन्यासिरागो रागाङ्गो जातः श्रीरागमेलतः ।
रिधलोपादौडुवोऽयं प्रातर्गीतः शुभप्रदः ॥

[व्यङ्कटमखीकृतचतुर्दण्डिप्रकाशिकायाम्]

स्वरास्तु मृदवोऽखिला ऋषभधौ च नारोहणे-
ऽवरोहसमये भवेयुरथ यत्र सर्वेऽपि च ।
समुल्लसति पञ्चमोंऽश इह षड्जसंवादिना-
ऽपराह्णसमयेषु निग्रहयुता धनाश्रीरियम् ।

[अप्पातुलसीकृतरागकल्पद्रुमाङ्कुरे]

४ असाउरीरागः

अस्य–आसावरी–इत्यपि नाम वर्तते ।

लक्षणम्—

मत्रिकाऽऽसावरी पूर्णा, सदा गेयातिकारुणा ।

[रागमञ्जर्याम्]

गान्धारश्च निषादश्च यत्र तीव्रतरौ कृतौ ।
निशून्यारोहणादिः सम्पूर्णाऽऽसावरी मता ॥

[हृदयप्रकाशे]

मृदूगमौ धनी चैव तीव्रस्तु ऋषभो धगौ ।
वादिसंवादिनौ यस्यां सासावर्यपि सङ्गवे ॥

[रागचन्द्रिकायाम्]

५ ललितरागः

अयं रागः उषःकाले प्रयुक्तो भवति ।

अस्य स्वरूपम्—

देशीमेले प्रजातः स्वरसकलयुतः धत्रिकश्चञ्चलाक्षः,
हस्ते पद्मं दधानः शुचिवसनरतः श्लिष्टभृङ्गारसर्वः ।
मुग्धस्त्रीणां समक्षे हसति सकपटं पूर्णताम्बूलवस्त्रः,
कामी कामावतारः कुटिलसुललितो भाति धृष्टः प्रभाते ।

[रागमालायाम्]

लक्षणञ्चेत्थम्—

गीतान्तेऽसौ भवति ललितः कोमलेनर्षभेण,
युक्तस्तीव्रैस्तु गमधनिभिः कोमलेनापि मेन ।
मांशः षड्जोऽत्र तु सहचरः पञ्चमो वर्ज्यतेऽस्मिं-
स्तुर्ये यामे निशि सुमतिभिर्गीयते मङ्गलार्हः ॥

[रागकल्पद्रुमाङ्कुरे]

६ वसन्तरागः

अस्य लक्षणं स्वरूपञ्च—

वसन्ते प्रहरे तुर्ये मकरध्वजवल्लभः ।
सम्भोगे विनियोक्तव्यो वसन्तस्तत्समुद्भवः ॥
पूर्णस्तल्लक्षणो देशी हिन्दोलोऽप्येष कथ्यते ।

[शार्ङ्गदेवकृतसङ्गीतरत्नाकरे]

वसन्ततौ गेयो मृदुलऋषभस्तीव्रसकलः,
पहीनो मद्वन्द्वः समगपुनरावृत्तिरुचिरः ।
सवादी मामात्योप्यहनि निशि चाव्याहतगतिः,
स्थितस्तारे षड्जे स जगति वसन्तो विजयते ।

[रागकल्पद्रुमाङ्कुरे]

७ गुर्जरीरागः

मिश्रितरागोऽयम् ।

अस्य स्वरूपं शास्त्रे—

धैवतांशग्रहन्याससम्पूर्णा गुर्जरी मता ।
सप्तमी मूर्च्छना तस्यां बहुल्या सह मिश्रिता ॥
रामकलीटोडिसंयुक्ता वराटीमिश्रिता पुनः ।
गुर्जरी जायते विद्वन् ! आद्ययामे प्रगीयते ॥

[नादविनोदे]

तोडिकैव किल गुर्जरीमता, पञ्चमेन रहिता यदा भवेत् ।
संवादर्षभधैवतांशिनी, गीयते सुमतिभिश्च सङ्गवे ॥

[रागकल्पद्रुमाङ्कुरे]

८ गौडी रागः

गौरी-इत्यपरनामाऽयं रागः-इति संभाव्यते ।

अस्य लक्षणम्—

रिः स्वरादिस्वरारम्भा रिकोमला धकोमला ।
गतीव्रा सानितीव्रा च गौरी न्यंशस्वरा मता ।।

[सङ्गीतपारिजाते]

स्वरूपञ्चास्य—

रामक्रीमेलजा या धगपरिरहिता सत्रिका षोडशाब्दा,
चित्रं वस्त्रं दधाना करधृतकमलाऽऽकर्णनेत्रा सुकेशी !
चैत्री मुल्तानिपूर्वीवरयवनपुरी कर्पटीभिश्च सार्धम्,
सङ्क्रीडन्ती दिनान्ते चतुररतिकला गौरदेहा तु गौडी ।।

[रागमालायाम्]

९ कर्णाटरागः

देशीभाषायामयम्–'कानड़' नाम्नाऽपि प्रसिद्धोऽस्ति ।

अस्य लक्षणम्—

शुद्धाः सप्तस्वरास्तेषु गान्धारो मध्यमस्य चेत् ।
गृह्णाति द्वे श्रुती गीता कर्णाटी जायते तदा ।।

[लोचनकृतरागतरङ्गिण्याम्]

गान्धारैकस्तीव्रतरो धैवतश्चैककोमलः ।
गैकस्तीव्रतरे मेले कर्णाटः ककुभाभिधः ।।

[हृदयनारायणविरचिते हृदयप्रकाशे]

१०—केदारराग:

सङ्गीतग्रन्थेष्वस्य भिन्नलक्षणानि प्राप्यन्ते ।

अस्य लक्षणम्—

गनीतीव्रतरे मेले केदारः श्यामनाटकः ।
भूपाली चेति केदारः सम्पूर्णो गादि मूर्च्छनः ।।

[हृदयप्रकाशे

मल्लारिमेल उक्तास्तीव्रतररिमृदुमतीव्रतरधाश्च ।
मृदुसः शुद्धाः समपा अस्मादेते तु मल्लारिः ॥
न्यंशन्यासग्रहकः पूर्णो निश्येव केदारः ।

[सोमनाथकृतरागविबोधे]

द्विमस्तीव्राऽन्यको मांश आरोहे रिगवर्जितः ।
क्वचित् कोमलनिर्यामे केदारः प्रथमे निशि ॥

[रागचन्द्रिकायाम्]

११ सामेरीरागः

अयं 'सावेरी' रागस्याऽपभ्रष्टशब्दः ।

लक्षणमस्य—

सपवर्ज्या च सावेरी धत्रिका प्रातरिष्टदा ।

[विट्ठलभट्टकृतरागमञ्जर्याम्]

सावेरीतीव्रगान्धारा धैवतोद्ग्राहसम्भवा ।
मध्यमांशा निहीना चारोहणे गनिवर्जिता ॥

[सङ्गीतपारिजाते]

मेलान्मालवगौडीयात्ख्याता सावेरिनामिका ।
आरोहे गनिवर्ज्यं स्याद् अवरोहे समग्रिका ॥
पञ्चमोऽत्र मतो वादी संवादी षड्ज ईरितः ।
गानमस्याः समादिष्टं प्रभाते गायनोत्तमैः ॥

[भातखण्डेकृतलक्ष्यसङ्गीते]

१२ विराडीराग :

'बराटी' नाम्नोऽपभ्रंशोऽयम् । अस्यानेके भेदा : शास्त्रेषु प्रथिताः, किन्तु लोके तेषां प्रसिद्धिर्वैधुर्यम् ।

अस्य लक्षणम्—

वराटी पूर्वसूर्युक्ता वरारी लक्ष्यविश्रुता ।
पूर्णारोहावरोहा च मारवा मेलनाश्रिता ॥
गान्धारोऽङ्गीकृतो वादी धैवतोऽमात्यसंनिभः ।
गानमस्याः समीचीनं दिनान्तेऽतिमनोहरम् ॥
प्राचुर्यान्माखाङ्गस्य क्वचित्तच्छङ्कनं भवेत् ।
मारवापञ्चमत्यक्ता रागभेदस्ततः स्फुटः ॥
सङ्गतिः सपयोश्चात्र तथैव गपयोः क्वचित् ।
स्यान्मध्यमस्य दौर्बल्याद् विशेषेण सुखप्रदा ॥
देशिकारस्तथा तोडी त्रिवेण्यपि यथायथम् ।
मिलन्त्यत्रेति संप्रोक्तं गानशास्त्रविशारदैः ॥

[भातखण्डेकृतलक्ष्यसङ्गीते]

१३ कल्याणरागः

अस्य लक्षणम्—

मनीतृतीयगतिको द्वितीयगतिकोऽपि रिः ।
एकैकगतिगान्धार एष कल्याणमेलकः ॥
सन्निः सम्पूर्णः कल्याणः सायङ्काले महारुचिः ।

[रागमञ्जर्याम्]

भातखण्डेमहोदयः स्वस्य लक्ष्यसङ्गीतेऽस्य रागस्य सविस्तरं लक्षणं सेतिहासम्-उक्तवान् । इमन (यमन) कल्याणरागः—

कल्याणमेलसंजातः इमनो लोकविश्रुतः ।
गनिसंवादसम्पन्न आद्ययामोचितो निशि ॥
केचित्संनिर्दिशन्त्येनं पारसीकप्रदेशजम् ।
अन्येऽस्मद्देशजं प्राहुर्बुधैः कार्योऽत्र निर्णयः ॥
पद्धत्यां दाक्षिणात्यानां नूनं स्यात् परिकीर्तितः ।
कल्याणो यमुना संज्ञो रात्रिगेयो निवर्जितः ॥

भाति मे त्विमनाख्योऽयं रागो यावनिकोद्धृतः ।
प्राविष्टो यवनैः प्रायः स्वकीये शासने पुरा ।।
रागतरङ्गिणीग्रन्थे तथैव हृत्प्रकाशके ।
रागोऽयं वर्णितः स्पष्टं कल्याणस्य स्वरैर्ध्रुवम् ।।

[लक्ष्यसङ्गीते]

१४ मल्हारः रागः

सङ्गीतग्रन्थेष्वस्य भिन्नलक्षणानि सन्ति, मल्लारोऽपरनामाऽयं रागः । लक्षणं यथा—

आन्धाल्युपाङ्गं मल्हारः षड्जपञ्चमवर्जितः ।
धन्यासांशग्रहो मन्द्रगान्धारस्तारसप्तमः ।।

[सङ्गीतरत्नाकरे]

गौरीमेलसमुद्भूता मल्लारी निस्वरोज्झिता ।
आरोहणे गहीना स्यात् षड्जादिस्वरसम्भवा ।।

[सङ्गीतपारिजाते]

धत्रिः सपाभ्यां हीनोऽयं मल्हारोऽह्युषसि प्रियः ।

[रागमञ्जर्याम्]

काफीमेलसमुत्पन्नः शुद्धमल्लरनामकः ।
आरोहेऽप्यवरोहे च गतिहीनौडुवो मतः ।।
मध्यमः सम्मतो वादी संवादी षड्ज ईरितः ।
गानमस्य समीचीनं वर्षाकाले मतं बुधैः ।।
मुक्तत्वान्मध्यमस्यात्र तथैव पधसैः स्वरैः ।
रागोऽयं लक्ष्यते स्पष्टमिति सर्वत्र सम्मतम् ।।

[लक्ष्यसङ्गीते]

१५ भैरवराग :

ग्रन्थेष्वस्य यानि विभिन्नलक्षणानि सन्ति,तानि सङ्गीतविलासे सङ्गृहीतानि वर्तन्ते, तथा च—

रत्नाकरमते प्राह भैरवस्तत्समुद्भवः ।
धांशो मान्तो रिपत्यक्तः प्रार्थनायां समस्वरः ॥
धैवतांशग्रहन्यासः सम्पूर्णः स्यात् समस्वरः ।
तारमन्द्रो यथा षड्जो गान्धारः शुद्धभैरवः ॥
रत्नाकरे द्विधा प्रोक्त : पूर्णौडुवप्रभेदतः ।
तत्रौडुवेन हिन्दोले तत्त्वभेद : प्रकथ्यताम् ॥
जन्यजनकभेदोऽपि भो सङ्गीतविशारदाः ! ।
पारिजातस्य मतवत् श्रीनिवासमते मतः ॥
भैरवे तु रिपौ न स्तो धैवतादिकमूर्च्छनः ।
तत्रोक्तौ च गनीतीव्रौ कोमलो धैवतः स्मृतः ॥
रागार्णवमतेऽपि स्यात् रिपहीनोऽथ मान्तगः ।
धैवतो विकृतो यत्र चौडुवः परिकीर्तितः ।
दामोदरकृते ग्रन्थे दर्पणेऽपीदमेव च ॥

[अनूपसङ्गीतविलासे]

१६ मारुणीराग :

प्राचीनरागोऽयम्—आधुनिक 'मारवा' रागसमानः ।

लक्षणमस्य—

रागेऽस्मिन् मारुसंज्ञे किलगमधनयस्तीव्रकाः स्युर्मूदूरिः,
वाद्येऽस्मिन् स्याद् द्वितीयो स्वरपविरहितो लक्ष्ययोगानुरोधात् ।
संवादी धैवतश्चस्फुटमिह गमनं साध्यतेऽतिश्रमेण,
सङ्गीताभ्यासशीलैर्नियतमविरतं गीयते सायमेव ॥

[रागकल्पद्रुमाङ्कुरे]

धमौ गरी गमौ गश्च रिसौ निधौ मधौ सरी ।
मारवा ऋषभांशाढ्याऽपा सायं चित्ररुपिणी ॥

[अभिनवरागमञ्जर्याम्]

१७ टोडीराग :

लक्षणंत्वित्थम्—

मनी तीव्रौ यस्यां खलु धगरयः सन्ति मृदवो,
मतो वादी षष्ठोऽस्य तु सहचरो गोऽतिमधुरः ।
गभीरा सम्पूर्णा प्रकटसग्रहन्याससुभगा,
प्रसिद्धा तोडीयं दुरधि गमना सङ्गवचरा ॥

[रागकल्पद्रुमाङ्कुरे]

धनी सरी गरी सश्च मपौ मगौ रिसौ ।
सम्पूर्णा तोडिका ज्ञेया धैवतांशा च सङ्गवे ॥

[अभिनवरागमञ्जर्याम्]

१८ देशाखराग :

देवसागः; देशाक्षीः, देशाख्यः, चास्य–अपराणि नामानि सन्ति ।
लक्षणञ्चास्य ग्रन्थेषु—

रिमौ पमौ सधपमाः परिगमरिसास्तथा ।
देशाखो हि विशेषेण षाडवः कथितो बुधैः ।

[हृदयनाराणयकृतहृदयकौतुके]

रितीव्रतरसंयुक्तो गतीव्रेणापि संयुतः ।
धगवर्ज्योऽवरोहे स्याद् गान्धारस्वरमूर्च्छनः ।
तीव्रो यत्र निषादः स्याद्देशाख्यः स विराजते ॥

[सङ्गीतपारिजाते]

THE WORK

• Hitherto unpublished early Sanskrit Ragakavya 'Gitgirisham' has been edited by Shree Prabhat Shastri the editor 'Sangamani' (quarterly Sanskrit magazine) on the basis of several manuscripts available in differnt libraries. The poem bears traces of the style of Gitgovindam by Jaya Deva. The author is Kavi Nripati Rama Bhatta. The poet introduces himself as Rama Bhatta son of Shree Nath Bnatta (canto xii.4).

• As a matter of fact this edition of the Gitgirisham fulfils a long-felt need of Sanskrit literature. In a Introduction to the work the learned editor has given along with a short life sketch of the author, an exaustive account of lyric poetry in Sanskrit lilerature, its definition and a scholarly analysis of the distinguishing characteristics of the present work, thereby he has made available to the students of sanskrit literature ample material on the historical aspects of the theory and Practice of musical lyric—form of poetry in Sanskrit as a literary form.

• The Kavya is divided in 12 cantos. The introduction provids an analysis, which facilitates understanding of the story to the readers. The appendix gives an account of the different metres used in the poem, An Index of the metres and lyrics also has been provided. Thus a study of this work will provide to the readers not only poetic enjoyment but also an accurate knowledge of metre and melodies. No doudt the poem stands of the best of poetics. The various amorous descriptions in the song and its rhetorical diction are captivating. The book will provide excellent reading to all lovers of poetry.